प्रवेश सं० ४९२२२ विषयः धर्मशास्त्रे क्रम सं०

नाम जारमल्लविलास: ग्रन्थकार महाराजा जारमल्ल:

पत्र सं० ~~६३, ६६-१६८, २३९-२५१~~ ६३, ६६-७२, ७४-८३, ८५-१०८, ११०-१२५, १२७-१५२, १५८-१६८, २३९-२५१ अपूर्ण

श्लोक सं० — अक्षर सं० (पंक्तौ) ३२ पंक्ति सं० (पृष्ठे) ८

आकारः ६ x ३.८ लिपिः दे० ना० आधारः का०

वि० विवरणम् अपूर्ण 13902

पी० एस० यू० पी०—७७ एस० सी० ई०—१६५१—५०,००० आ० ८१४६

Indira Gandhi Nation
Centre fo

॥ता।यदापुनर्द्विधितनक्षत्रहद्धादिनद्वयेप्यर्द्धरात्रेरोहिणीनक्षत्रयोगस्तदापरदिनेजय
न्तीव्रतंनपूर्वदिनेवर्जनीया।अयतेनसप्तमीसंयुताष्टमी।सकलापिनकर्त्तव्यासप्तमीसंयु
त,ष्टमीत्यादिवचनेनपूर्वविद्धा:सप्तमीविद्धामानिषेधश्रवणात्। उत्तरयदि
केवलमात्राष्टमी।सायदिरोहिणीयुक्तानुपरिसकलानवमीबुधवारेणसोमवारेणवा
युति।तदाष्टमीस्वल्पाप्युपोष्यानपूर्वा। उदयेचाष्टमीकिंचि
त्सकलायदिभवेत्तबुधवारेणप्राजापत्यर्क्षसंयुता।अपिवर्षशतेनापिलभ्यतेवान
वा। प्रेतयोनिगतानांतुप्रेतत्वंनाशितंनरै:।यै:कृताश्रावणेमासिरोहि
रोहिणीयुता।किंपुनर्बुधवारेणसोमेनापिविशेषत:।किंपुनर्नवमीयुक्ताकुलको

किंवा नन्वनुन्यूनविद्धाया दिनक्षयस्पृग्वा कथं तत्रोपवासः। तिथिक्षये तूपवासनिषे
दिनक्षयनिमित्तस्योपवासस्य प्रतिषेधो न तु निमित्तान्तरनिमित्तकस्य। इत्येका
र्निर्णये निपुणतरं निरूपणीयमिति। तत्रेदं नित्यकाम्यो प्राजापत्यर्क्षसंयुक्ताश्राव
णेताष्टमी। वर्षे वर्षे तु कर्तव्या तुष्ट्यर्थं चक्रपाणिन इति। वाक्याद्वीप्साश्रवणाच्च नित्यता
ध्यते। यथा वसन्ते वसन्ते ज्योतिषा यजेतेत्यत्र। तुष्ट्यर्थं देवकीसूनोर्जयन्तीसंभवं
व्रतम्। कर्तव्यं वित्तमानेन भक्त्या भक्तजनैरपि। अकुर्वन्याति निरयं यावदिन्द्राश्चतुर्दशेति
वाक्यात्तदकरणे निरयपातश्रवणाच्च। निरयपातश्च न पातकमन्तरेणेति। तस्याकरणे प्र
त्यवायः कल्पनीयः। एवमांसे खरं का कं च येनं वा मुनिसत्तम। मांसंना हि प ६३
ग॥

यद्यप्यनित्यत्वेनाकरणे प्रत्यवायस्तथाप्यनुकल्पोपि स्यात्। यथा सोमादी
नामसंभवे वैश्वानरीष्टिरनुकल्पः। प्रतिसंवत्सरं सोमः पशुः प्रत्ययनं तथा। क
र्तव्याग्रयणेष्टिश्च चातुर्मास्यानि चैव हि। एषामसंभवे कुर्यादिष्टिं वैश्वानरीं द्विज इति
नित्यैकादश्यकरणे। एकभक्तेन नक्तेन हे क्षीणा ह्यनाहरः क्षिपेत्। इत्यथकं प्र
त्यनुकल्प उक्तस्तथात्रापि स्यात्। तस्यानुकल्पविधानमेव नित्यत्वबोधकं तस्याक
रणे प्रत्यवायादेव निश्चतोपपन्नेत्यलमतिप्रसंगेन। अत्र च यथोक्तनिर्णयोनुसरणी
यः प्राचीननिबंधान्तरेष्वपि तथैवाभिधानात्। शुद्धा विद्धाथवा या लवतिथि
मान्यूनता वा क्षिता वा प्राजापत्यर्क्षयुक्ता तवत्तु विरहिता तेन वा सर्वथा सो। कार्या स

Indira Gandhi National Centre for the Arts

द्वैफलार्थंकथितवचनतः॥ जन्माष्टमीयं स्कंदे विष्णुरहस्ये सकलकलिम
लक्षालयैनोचतज्ञेः॥ विद्धा वृद्धाष्टमीश्याद्गुलय दिवसयोर्दृश्यते नैव किं वित्साजा
पत्यं दिनर्क्षं यदि तु वचनतस्तत्र विद्धापि कार्या॥ शुद्धा वृद्धाष्टमी या भवति विरहिता रो
हिणी ते न तेन पूर्वा चैवोत्तरा चोपवसनविधितस्तत्र पूर्वैव कार्या॥ शुद्धा विद्धापि वृद्धा स
वति परदिने वाष्टमी वारो हिण्या संयुतां तामुपवसतु जनो नात्र संदिग्धमस्ति॥ शुद्धं विद्धं ६६
च वृद्धं द्वयमपि दिवसे रोहिणी योगयुक्तं स्याद्विद्धे वा तामुपोष्य व्रतकरणवतामष्टमी
नात्र युक्ता॥ शुद्धं वृद्धं च वृद्धं द्वयमपि दिवसे अर्द्धरात्रे तु योगो यं रोहिण्या भवति क्व चिन्न
तामेवोपवसेन्नान्यामर्द्धरात्रोपयोगतः॥ अष्टम्या रोहिणीयोगो मध्यरात्रे दिनद्वये तदोत्त

रेव कर्त्तव्या न पूर्वेत्येष निश्चयः॥ जयंती बुधवारेण सोमवारेण वा पुनः॥ लप्स्यते दैवयोगे
न तामुपोष्य महाफलमिति संग्रहश्लोके रपि तथैव निर्णया विधाना दिति॥
विलासे श्रीधरस्य कृतिनः कृतिरेषा संततं कृति
मुदे समस्तु॥ ॥
जन्माष्टमी पर्यन्त तिथिनिर्णयः॥ ॥ ॥ ॥
तत्र प्रशंसा देवीपुराणे॥ ॥ आश्विने मासि संप्राप्ते महिषासुरनिबर्हणी
देवी संपूज्यते या ये अर्द्धरात्रेऽष्टमी युता घातयंति पशून्भक्त्या ते भवंति महाबलाः॥ बलिं
च ये प्रयच्छंति सर्वभूतविनाशनं तेषां तु तुष्यते देवी यावत्कल्पं तु शंकर रक्षकीडं तिविवि

धेतेर्गौर्देवलोकेसुदुर्ल्लभोनाश्चर्य्येयाश्वयस्तेषांनवम्यातुलयंलवेत्।नवदेवग्रहादैत्य
नासुराश्चपन्नगाः।पीडयंतियहाध्यस्मादेवीपादैस्समाश्रिताः।यावद्भूर्वायुराका
शंजलंवह्निशशिग्रहाः।तावच्चचंडिकापूजाख्यविष्यंतिसदाभुवि।प्राह्हकालेविशेषेण
आश्विनेष्वष्टमीषुच।महाशब्दोनवम्यांचलोकेख्यातिंगमिष्यति।प्राहकालइतिमासच
तुष्टयात्मकवर्षाकालाभिप्रायेण।एतत्तेदेवराजेन्द्रस्वर्गवासफलप्रदम्।परापरविस्त ६७
रेणतवसंक्षयाप्रदर्शितं। महानवम्यांपूजेयंसर्वकामप्रदायिका।सर्वेषुवर्णवर्णे
षुतवभक्त्याप्रकीर्तिता।कृत्वाप्नोतियशोराज्यंपुत्रायुर्द्धनसंपदः। मासिचाश्व
युजेवीरशुक्लपक्षेत्रिशूलिनीं।नवम्यांपूजयेद्यस्तुतस्यपुण्यफलंशृणु।अश्वमेधसहस्र

स्यराजसूयशतस्यच।तत्फलंलभतेवीरदिविदेवगणैर्वृतः॥ अष्टम्यांनव
म्यांचजगन्मातरमंबिकां।पूजयित्वाश्विनेमासिविशोकोजायतेनरः॥वचनाधिकारिणश्च
देवीपुराणोक्ताः॥ शृणुशक्रप्रवक्ष्यामियथात्वंपरिपृच्छसि।महासिद्धिप्रदंधन्यं
शौर्व्वशत्रुनिवर्हणम्।सर्वलोकोपकारार्थंविशेषाद्दसिह्नत्तिषु।कर्त्तव्यंब्राह्मणाद्यैस्तु
क्षत्रियैर्लोकपालकैः।गोधनार्थंतथावैश्यैःशूद्रैःपुत्रसुखार्थिभिः।सौभाग्यार्थंतथास्त्रीभि
स्तैश्चधनकांक्षिभिः।महाव्रतंमहापुण्यंशंकराद्यैरनुष्ठितं।कर्त्तव्यंदेवराजेन्द्रदेवीभक्ति
समन्वितैः॥ तस्मात्त्वंमहापुण्यानवमीपापनाशिनी।उपोष्यायुष्मयत्नो
नसततंसर्वपार्थिवैः।मूलोन्नवेणाक्षत्रेणसंयुक्ताविविवन्नृप।विशेषतोध्यानजपैर्बलेश्च

Indira Gandhi National
Centre for the Arts

द्वेःसयोवनेःब्राह्मणैःक्षत्रियैर्वैश्यैःशूद्रैरन्यैश्चकेवलैः।एवंनानाम्लेच्छगणैःपूज्यतेसर्व
दस्युभिः।अंगवंगकलिंगैश्चकिन्नरैर्बर्बरैःशकैःइत्यादिवचनान्निर्णयपर्यालोचनयादेवीरू
क्षमनुष्यमात्रस्यैवात्राधिकारइति।तथानवमीबलिदानप्रकरणे।  अत्रदा
नानिदेयानिसोपवासेननरैर्नृप।गोभूसुवर्णादिराजेंद्र•वस्त्राणिविविधानिच।अमांसेरुधि
रैर्हृत्वादेवीतुष्यतिवैभृशं।महिषच्छागमेषाणांरुधिरेणतथानृप।सुमेकमेकंवरदातृप्ता
भवतिचंडिका।सुमेकंवर्षंरुधिरेणोरणस्यहतर्पिताविधिवन्नृप।उरणश्चमेषस्य।अज ६८
स्यदशवर्षाणिरुधिरेणतुतर्पिता।महिषेणशतंवीरतृप्ताभवतिचंडिका।सहस्रंतृप्तिमा
यातिस्वदेहरुधिरेणसा।तर्पिताविधिवद्दुर्गासिंहवाराहरुजंयके।नारेणशिरसावीरपूजि

नं५

ताविधिवन्नृप।तृप्तासवेङ्गशंदुर्गावर्षाणांलक्षमेवच।  अस्त्रत्रयंचमूलादौसप्तम्या
माश्विनेसिते।चंडिकामुपहारैश्चपूजयेदष्टहृदयो।कुर्याज्जागरणमष्टम्यांनवम्यांवि
धिवद्बलिं।सदष्टम्यांबलिहंत्यर्थंकुर्यान्नीराजनंनृप॥  दु
र्गाष्टमीनवम्यौमिश्राग्राह्या।नसप्तमीशल्योपहता।युग्मामिकउभूतानामितिसामान्य
वाक्येनबोधायनेनैवसुरंपयोर्युग्मासिद्धाना।विशेषवाक्याच्च।  अष्टम्यानवमी
विद्धानवम्यावायुताष्टमी।अर्द्धनारीश्वरप्रायाउमामाहेश्वरीतिथिः।अष्टम्यांचनवम्यां
चजगन्मातरमंबिकां।पूजयित्वाश्विनेमासिविशोकोजायतेनरः।  सप्त
मीवाष्टमीयुक्तानसप्तम्यायुताष्टमी।सर्वेषुव्रतकल्पेषुअष्टमीपरतःशुभा।अष्टमीनवमी

Indira Gandhi National
Centre for the Arts

युक्तानवम्यावाष्टमीयुता।अर्द्धनारीश्वरज्ञायातिथिःसर्व्वव्रतादिषु। नाग
विद्धातुयाषष्ठीसातुविद्धोमहेश्वरः।चतुर्दशीकामविद्धानोपोष्यामलिनाःस्मृता।नागश्च
पंचमी।सानुःसप्तमी।माहेश्वरोष्टमी।कामश्चयोदशी।इत्यादिवचनजातेरष्टम्यानवमी
विद्धायाविधेयत्वप्रतिपादनात्।सप्तमीविद्धातुप्रयत्नेनवर्ज्जनीया।तत्रमहादोषश्र
वणात्।पुत्रान्हंतिपशून्हंतिहंतिराष्ट्रंसराजकं।हंतिजातानजातांश्चसप्तम्यासहि
ताष्टमी।तस्मात्सर्व्वप्रयत्नेनसप्तमीवेधसंयुता।वर्ज्जनीयाष्टमीचाथध्रुवोराज्यमतीश्रु ६९
तिश्चसप्तमीशल्यविद्धावर्ज्जनीयासदाष्टमी।स्तोकापिसातिथिश्चत्यापष्ठ्यांसूर्योदा
योत्सवेत्। मूलनक्षत्रयुतापूर्व्वाषाढनक्षत्रयुतावाग्राह्या। अथयुक्तश्च

क्तनवमीपक्षेत्वयाष्टमीमूलसंयुता।पूर्व्वाषाढयासार्द्धंपक्षद्वययुताथवा।सामहानवमी
नामत्रैलोक्येपिसुदुर्लभा।कन्यांगतेसवितरिशुक्लपक्षेयुताष्टमी।मूलनक्षत्रसंयुक्ताक्तासाम
हानवमीस्मृता। मूलनक्षत्रयुक्तापिस्वल्पयासप्तम्याविद्धाअष्टमीत्याज्या। मूले
नापिहिसंयुक्तासदात्याज्याष्टमीबुधैः।लेशमात्रंहिसप्तम्यायदिस्यात्दिहदूषिता।यदापुनर्द्वि
तीयेह्निस्वल्पापिनवमीनदृश्यते।तदासप्तमीमिश्राष्टमीकर्त्तव्या।त० यदासूर्योद
येष्टम्यान्नवमीवापरेद्युर्नितदाष्टमींप्रकुर्वीतसप्तमीसहितांद्वय।नवमीतुयदासूर्योदयांघ्या
न्नानितष्ठ्यांवलिदानादिकंकर्त्तव्यम्।सूर्योदयेपरिषक्तापूर्णाष्टादपरायदि।वलिदानंप्रक
र्त्तव्यंतत्रदेशस्वस्वावहम्।वलिदानेकृताष्टम्यांपुत्रसंगोभवेन्नृप।मूलेनप्रजयेद्देवींतथाश्च

रामराम

Indira Gandhi National Centre for the Arts

तिलदैवते वैश्वदेवे च नक्षत्रे पूजिता दुःखहा सदैव॥ प्रतिपद्या हरेत्खड्गं द्वितीयाविद्धं तं ध्रुवः॥ तृ
तीयायां करे वज्रं चतुर्थ्यां चर्म निर्मलं॥ पंचम्यां मादेट्शूलेषष्ठ्यां तु परशुं तथा॥ गदां बिभ्रत्व
सप्तम्यां अष्टम्यां शक्तिमुद्गरौ॥ नवमी च सदा देव्या मूर्तिर्दैत्यविनाशिनी॥ अतएव हि दुर्गा सा॥
अष्टमी नवमी युता॥ एतेन नवमी निर्णयोपि व्याख्यातः॥
वत्सरं अयोर्युग्माभिधानात्॥
अष्टम्या नवमी विद्धा कर्तव्या फलकांक्षिभिः॥ न कुर्यान्नवमीं तात दशम्या तु कदाचनेति॥ ७०
पंचमी सप्तमी चैव दशमी च त्रयोदशी॥ प्रतिपन्नवमी चैव कर्तव्या संमुखा तिथि
रिति॥ अत्र त्रयोदशी शुक्लत्रयोदशी॥ संमुखा सायाह्नव्यापिनी॥ नवम्येका ७

दशी चैव दश॥ विद्धा यदा सदैव॥ तदा वर्ज्या विशेषेण गंगांभः स्वहृतो यथा॥
अष्टमी नवमी विद्धा कर्तव्या फलकांक्षिभिः॥ मद्यगो दशमी चैव कर्त्र
व्या द्विजसत्तमेति॥ दुर्गानवमी॥ प्रतिपत्पंचमी भूतं सावित्री वटपूर्णिमा॥ नवमीद
शमी चैव नोपोष्याः परसंयुता इति॥ प्रतिपत्पंचमी कृष्णाष्टमी भूतेच सप्तमी॥ नवमी दशमी शु
क्लत्रयोदश्यश्रुतिर्हरिः॥ सावित्री माघपौर्णमासी चतुर्थी गणसंज्ञिता॥ रंभा तृतीया चेत्येता उ
पोष्याः पूर्वसंयुता इति जाबालवाक्यात्॥ दशमी यद्यादित्योदयादारभ्य अहोरात्र॥
रात्रिशाम्न एकादशी विद्धा॥ नवमी विद्धा स्याद् द्वितीयमुदयं प्राप्ता॥ तयोरेकाविद्ध
या उपवासादिव्रतेषा॥ संपूर्णा दशमी कार्या पूर्वया परयाथवा॥ युक्ता न दूषि

Indira Gandhi National
Centre for the Arts

तायस्मादितिसासर्वतोमुखीति।यदात्वेकस्मिन्नपिदिवसेउदययोगिमीनलभ्यतेतदापू
र्वविद्धैवग्राह्येत्याज्ञः। तद्यामाहात्म्यंनारदीयपु
राणे। एकादशीसमुद्भूतेनवह्निनापातकेंधनं।भस्मतांयातिराजेंद्र अपिवर्षशत
तोद्भवम्।।नेदृशंपावनंलोकेनराणांभूपविद्यते।यादृशंपद्मनाभस्यदिनंपातकहानिदं।।
तावत्पापानिदेहेस्मिंस्तिष्ठंतिमनुजाधिप।यावन्नोपवसेज्जंतुःपद्मनाभदिनंशुभम्।अश्वमेध ७१
सहस्राणिवाजपेयशतानिच।एकादश्युपवासस्यकलांनार्हंतिषोडशीं।।एकादशेंद्रियैः
पापंयत्कृतंभवतिभूपते।एकादश्युपवासेनतत्सर्वंविलयंनयेत्।।एकादशीसमंकिंचित्पाप
त्राणंनविद्यते।स्वर्गमोक्षप्रदाह्येषाराज्यपुत्रप्रदायिनी।।नगंगानगयाभूपनकाशीनचपुष्क

९ नरे ती

रम्।नचापिकौरवंक्षेत्रंनरेवानचदेविका।यमुनाचंद्रभागावत्तुल्याभूपहरेर्दिनात्।।अनाया
सेनराजेंद्रप्राप्यतेवैष्णवंपदम्।चिंतामणिसमाह्येषाथवापिनिधिःसमा।संकल्पपादपप्र
ख्यावेदवादोपमाथवा। एकामेकादशींवापिसमुपोष्यजनार्दनं।कामेनापिसमा
स्यर्च्यसंसारान्मुक्तिमाप्नुयात्।।प्रसंगाद्वाथमोहाद्वादंभाद्वात्रिदशाधिप।एकादश्यांमनाः
नसंखेतपिवेत्तोयंनखादेत्कूर्म्मरूपकरो।।एकादश्यांनभुं
क्त्वासर्वदुःखात्प्रमुच्यते। ब्रह्मचारीगृहस्थश्चवानप्रस्थोयतिस्तथा।ब्राह्मण
जीतपक्षयोरुभयोरपि।
क्षत्रियोवैश्यःशूद्रोलर्ईमतीतथा।।अलर्ईकातथाच्छेवाध्रुतावैदेहिकादयः।एकादश्यां
नभुंजीरन्पक्षयोरुभयोरपि। गृहस्थोब्रह्मचारीवावानप्रस्थोयतिस्तथा।।ए

Indira Gandhi National
Centre for the Arts

कादश्यां हि यो भुंक्ते भुंक्ते गोमांसमेव हि। परमापदमापन्नो हर्षे वा समनुष्ठिते। सूतके मृत
के वापि न त्याज्यं द्वादशीव्रतमिति विष्णुधर्मे निषेधान्सूतकादावपि न व्रतत्यागः।
सूतके च नरः स्नात्वा प्रणम्य मनसा हरिं। एकादश्यां न भुंजीत व्रतमेतन्न लुप्यते।
मृतकान्ते नरः स्नात्वा पूजयित्वा जनार्दनं। दानं दत्वा विधानेन व्रतस्याफल्यमश्नुत इति।त
दशाद्यां नियताहारो मांसमैथुनवर्जितः। एकादश्यां न भुंजीत पक्षयो
रुभयोरपि। तद्विदं नित्यं काम्यं चेति द्विविधम्। नित्यं सदा यावदायुर्न कदाचिदु
त्क्रमेत्। उपेक्ष्यातिक्रमे दोषश्रुतेस्त्यागचोदनात्। फलाश्रुतेर्वीप्सया च तन्नित्यमिति की
र्तितम्। सायुज्यादिफलश्रुत्यात्तत्काम्यमुदीरितं। तदेकादशीव्रतं नित्यमित्य १२

दशीव्रतं काम्यं च। यदीच्छेद्विष्णुसायुज्यं श्रियं संततिमात्मनः। एकादश्यां न भुंजी
त पक्षयोरुभयोरपीति। अत्राधिकारिणस्तत्रैवोक्ताः। आशीतिवर्षमष्टाब्दात्परं सर्वेऽधिकारिण इति
अष्टवर्षाधिको यस्तु अपूर्णाशीतिवत्सरः। एकादश्यामुपवसेत्पक्षयो
रुभयोरपि। नारदीये। अष्टाब्दादधिको मर्त्यो अपूर्णाशीतिहायनः। भुंक्ते यो मानवो मोहा
देकादश्यां स पापकृत्। असामर्थ्यादिकरणे विशेष उक्तः। असामर्थ्ये शरीरस्य व्रते च सम
मुपस्थिते। कारयेद्धर्मपत्नीं वा पुत्रं वा विनयान्वितं। भगिन्या भ्रातृशिष्येष्वकृते च फलमा
प्नुयात्। नार्यास्तु व्रतं कुर्याद्भार्याया अपि पतिः तथा। असामर्थ्ये तयोस्त्वन्यो व्रतं गोनवृ
ह्यते। सभर्तृकायास्तु भर्तुरनुज्ञयैवोपवासव्रतेऽधिकारः। विष्णुः। पत्यौ जीवति या नारी उप

Indira Gandhi National Centre for the Arts

थव्रतचारिणी।आयुष्यंसाहरतेपत्युःसानारीनरकंव्रजेत्। नारीखल्वननुज्ञाताभ
र्त्रावापिसुतेनवा।निःफलंतुभवेत्तस्यायत्करोतिव्रतादिकं।आदिपदात्तिथ्यादीनामुपसं
ग्रहः।तर्हितयाकिंकर्तव्यंतदाह।कामंभर्तुरनुज्ञायामुपवासंसमाचरेत्।तथाकुसुमैर
प्यलंकारंसिंदूरंरक्तवाससी।विधवायास्तोपवासोपिअवैधव्यकरंपरं। रजोदर्शनेपि
नव्रतत्यागः। आरब्धदीर्घतपसांनारीणांचेद्रजोभवेत्।तेनापिनहितंतासांन ७४
तुष्येतकदाचन।तथाच गर्भिणीसूतिकावापिकुमारीयदिरोगिणी।यद्यशु
द्धातदान्येनक्रियमाणंप्रकारयेत्।तथा आत्मापुरोधाआचार्योभ्रातापत्नीसखा
पिवा।एतेधर्मार्थकार्येषुजायन्तेप्रतिहस्तकाः।एतैःकृतंमहादेविस्वयमेवकृतंभवेत्।

शृणुयोवाप्यमुद्दिश्यएकादश्यामुपोषणं।यमुद्दिश्यकृतंविप्रव्रतंतस्य श्री
फलंभवेत्।कर्त्रादशगुणंपुण्यंप्राप्नोत्यत्रनसंशयः।नारीचपतिमुद्दिश्यएकादश्यामुपोषि
ता।पुण्यंशतगुणंप्राहुर्मुनयःपारदर्शिनः।उपवासफलंतस्याःपतिःप्राप्नोत्यसंशयं।पि
तुर्मातुश्चभ्रातुरर्थेआचार्यार्थेविशेषतः।उपवासंप्रकुर्वाणःफलंशतगुणंलभेत्।यमुद्दिश्य
कृतंसोपिसंपूर्णंफलमाप्नुयात्।नार्यादिसर्वहीनस्यासामर्थ्येचप्रकारःस्कंदपुराणोक्तः।
असक्तःउपवासस्यस्वल्पंकिंचित्प्रकल्पयेत्।सर्वथापुरुषैःकार्यमेकादश्यामुपोषणं।अ
शक्तानुग्रहश्चैवंचशक्तेर्नित्यतांशमयति एकभक्तेननक्तेनतथैवायाचिते
नवादानेनतपसावापिनैवाद्वादशिकोभवेत्। एकभक्तेननक्तेनतथैवाया

चिंतनंवा। उपवासेनदानेनमनमिर्द्वादशिकोलवेत्॥ अथवा विप्रमुखेभ्योदानंदद्या
द्यशक्तितः। एवंकरोतियःकश्चिदेकादश्यांतुशक्तितः। उपवासफलंतस्यसमग्रंसंभविष्य
ति॥ नक्तंहविष्यान्नमनोदनंवाफलंतिलाःक्षीरमथांबुचाज्यम्॥ यत्पंचगव्यंय
दिवापिवायुःप्रशस्तमत्रोत्तरमुत्तरंच॥ एकभक्तेननक्तेनक्षीणःवृद्धातुरःक्षिपेत्॥ प
योमूलफलैर्वापिननिर्द्वादशिकोभवेत्॥ अगृहीतव्रतेद्वैरशीतिरूर्ध्वजीविभिः ७५
उपवासासमर्थैश्चकर्तव्यंतदाह। उपवासात्परंभैक्ष्यंभैक्ष्यात्परमयाचितं। अयाचितात्प
रंनक्तंतस्मान्नक्तेनवर्त्तयेत्॥ उपवासेष्वशक्तानामशीतिरूर्ध्वजीविनां। एकभक्तादि
कंकार्यमाहबोधायनोमुनिः॥ तत्रैकभक्तनक्तायाचितादीनांलक्षणंपूर्वमेवोक्तं॥ [illegible]

ल२

त्तरविधेर्विहितम्। यथाहेमंतिकंसिताखिन्नंधान्यंमुद्गास्तिलायवाः। कलायकंगुनीवारा
वास्तूकंहिमलोचिका। षष्टिकाकालशाकंचपनसाम्रहरीतकी॥ पिप्पलीजीरकंचैवनागर
गकतिंतिली। कदलीलवलीधात्रीफलान्यगुडमैक्षवम्। पयोऽनुद्धृतसारंचगव्यंचदधिसर्पि
षी॥ लवणेसैंधवसामुद्रे। मूलकेकेमुकेतरम्। अतैलपक्वंमुनयोहविष्यान्नंप्रचक्षते॥ अक्षा
रंचप्रशस्तं॥ आमतंडुलमुद्गाश्चगव्यंदधिघृतंपयः। अक्षाराःकथिताह्येतेहः॥ राध्या
न्यप्रकीर्तिताः॥ दंतकाष्ठंतथैवापित्रिकटुत्रिफलातथा। सोऽप्येतत्रतथैवैतदक्षारंपरिकल्प
ते॥ मूलकंचपटोलंचवज्रकंसंसूरणादियत्। कोषकारश्रेलेदाश्चविकारा
गुडवर्जिताः॥ हविष्याणिविशृंगाटाःशालूकादिबिसादियत्॥ अपरमप्यक्षारंयथा। गोक्षी

Indira Gandhi National Centre for the Arts

रंगोघृतंचैवधान्यंमुद्गास्तिलायवाः।अक्षाराःकथितास्येतेक्षाराश्चान्येप्रकीर्तिताः।रकल्क
श्चवर्जितंधान्यंवज्रशस्यम्। क्षारंक्षौरंचलवणंमधुमांसानिवर्जयेत्। तिल
मुद्गाद्दतेशस्यंमाषगोधूमकोद्रवौ।चीनकंदेवधान्यंचचणकंचतथैवहि।वयु।षष्ठिःधान्यं
तथौषध्यमेषक्षारगणःस्मृतः।दशम्यांतुतथारात्रौभुक्त्वाचांद्रायणंचरेत्।इत्यंक्रमतो
रात्रिभोजनमेतत्क्षारादिकर्जनेदशम्यामपि। प्रातर्हरिदिनेविप्रा मिष्टं
येकभोजनाः।अक्षारलवणाःसर्वेहविष्यान्नविधानतः।स्मरध्वंदेवदेवेशंपुराणंपुरु ७८
दशमीकृत्ये षोत्तमं। कांस्यंमांसंमसूरांश्चक्षौद्रंचानृतभाषणं।पुनर्भोजनमत्यांबुंदशम्यांपरि
वर्जयेत्। कांस्यंमांसंमसूरंचचणकंकोद्रवंतथा।शाकंमधुपरान्नंचभोजनद्वय

मैथुनम्।द्वादश्यांतुदशैतानिवैष्णवःपरिवर्जयेत्।शाकंमांसंमसूरंचपुनर्भोजनमैथु
नं।द्यूतमत्यंबुपानंचदशम्यांचैववर्जयेत्।हैमंतषष्टिकस्तथामुद्गाःकलायाःसतिलायवाः।
श्यामाकाश्चैवनीवारागोधूमाद्याव्रतेहिताः।कूष्मांडालाबुवार्ताकंन्यालंक्यःपौतिकां
स्त्यजेत्।चरुर्भैक्ष्यंशक्तुकालशाकंदधिघृतंपयः।श्यामाकाःशालिनीवाराजीरकाम्
हतंडुलाः।हविष्यव्रतनक्तादौअग्निकार्यादिकेहिताः। मुद्गश्चचणककालायमिथु
नानांद्वयीयिवा।एतेषांव्यानिनाश्नीयान्मिथुनानामनापदि।मिथुनानांद्विदलानां
श्रमाहिषंतथासर्पिर्दधिक्षीरमथापिवा।एतद्धितंमतंविप्रमिथुनस्य
विपर्ययोऽस्नानोदनंयथा। दंतखाद्यंचवेद्याक्षितदोदनमितिस्मृतं।स्तस्ं

सोऽप्यंतथालेह्यमोदनंत्रिपुकीर्तितम्।पेयंचानोदनंप्रोक्तमिति।इयंचात्रेतिकर्त्तव्यता।
गृहीत्वौदुंबरंपात्रंवारिपूर्णमुदङ्मुखः।उपवासंतुगृह्णीयाद्यद्वावार्यवधारयेत्। इतिव
राहपुराणवचनात्।औदुंबरंताम्रपात्रम्।संकल्पमंत्रश्चविष्णुस्मृतौ।यथोक्तः।एकाद एकादश्यांव्रते संकल्पः
श्यांनिराहारःस्थित्वाद्येवापरेहनि।भोक्ष्येहंपुंडरीकाक्षशरणंमेभवाच्युत।इत्युच्चार्य
नरोविद्वान्पुष्पांजलिमथार्पयेत्।मन्त्रायंसंकल्पस्तुविनाप्रातरेवकर्त्तव्यः।एवंसंक ७७
ल्पद्वादश्यां।भगवंतंदेवमभ्यर्च्यव्रतंनिवेदयेत्।अयंचव्रतनिवेदनमंत्रःपठनीयः।अ द्वादश्यांव्रतनिवेदनमंत्रः।।
ज्ञानतिमिरांधस्यव्रतेनानेनकेशव।प्रसीदसुमुखोनाथज्ञानदृष्टिप्रदोभव।उपवासल उपवासलक्षणं
क्षणंतु।वर्ज्जनीयानिसंत्यज्यगुणान्संश्रयतेहितान्।निराहारस्थितिर्यास्तउपवासःप्र

कीर्त्तितः।गुणाश्चशास्त्रोक्तनियमाः।वर्ज्जनीयाश्चाहसुमंतुः।विहितस्याननुष्ठानमिंद्रिया
णामनिग्रहः।निषिद्धसेवनंनित्यंवर्ज्जनीयंप्रयत्नतः। पतितपाखंडनास्तिकादिसं
लापणमनृतश्लीलादिकमुपवासदिनेवर्ज्जयेत्।आदिपदादिंद्रियचापलहिंसादिपरि
उपवासलक्षणं ग्रहः। उपावृत्तस्यपापेभ्योयस्तुवासोगुणैःसह।उपवासःसविज्ञेयःसर्वभो
गविवर्जितः।पापेभ्योव्रतादुत्तयानिषिद्धेभ्यउपावृत्तस्यनिवृत्तस्यगुणैर्हरिस्मरणनाम
संकीर्तनार्चनादिरूपैःसहवासोवस्थानमहोरात्रंयत्सउपवासइत्यर्थः।गुणाश्चविष्णुध
र्म्मेणोक्ताः।तज्जाप्यजपनध्यानमकथाश्रवणादिकं।तदर्चनंचतन्नामकीर्त्तनश्रवणाद उपवासदिने
यः।उपवासकृतामेतेगुणाःप्रोक्तामनीषिभिः। असत्यसंभाषणंद्यूतंदिवास्वप्नंचमै

Indira Gandhi National
Centre for the Arts

थुनम्॥ एकादश्यां न भुंजीत उपवासपरो नरः॥ ।पतितपाषंडसंभाषानृतक्षेपादिकं वा
र्जयेदिति। असकृज्जलपानाच्च सकृत्तांबूलचर्वणात्॥ उपवासो विनश्येत दिवास्वापाच्च
च्च मैथुनात्॥ स्मरणं कीर्तनं केलिः प्रेक्षणं गुह्यभाषणं। संकल्पोऽध्यवसायश्च
कार्यनिष्पत्तिरेव च॥ एतन्मैथुनमष्टांगं प्रवदंति मनीषिणः॥ स्त्रीणां संप्रेक्षणात्स्पर्शात्ताभिः सं
कथनादपि। सिद्ध्यति न व्रतं सम्यक् ब्रह्मचर्यादिकं च यत्॥ ब्रह्मचर्यं तथा शौचं सत्यमामिषव ७१
र्जनम्॥ व्रतेष्वेतानि चत्वारि वरिष्ठानीति निश्चयः॥ वरिष्ठानि व्रतसिद्धिसंपादकानि। आमि
षवर्जनं तु पारणदिने व्रतदिने चाशेषत्वाविति। स्त्रीणां तु प्रेक्षणात्स्पर्शात्ताभिः सं
कथनादपि। निष्पंदते ब्रह्मचर्यं न दारेष्वृतुसंगमात्॥ तावत्पूर्वकं स्त्रीणां प्रेक्षणादिति [illegible]

उपवासे स्त्रीणां धर्मानाह

ब्रह्मचर्यं न नश्यतीत्यभिप्रायः॥ उपवासे तथा श्राद्धे न खादेद्दंतधावनं। दंतानां काष्ठसं
योगो हंति सप्त कुलानि वै। दंतकाष्ठग्रहणमेवात्र निषिध्यते। न चानुकल्पोपि। मुख्यसंस्तवएव
तस्य विधानात्॥ [illegible] पुष्पालंकारवस्त्राणि गंधमाल्यानुलेपनं॥ उपवासेन
दुष्यंति दंतधावनमंजनमिति। तस्मात्तदेकस्त्रीविषयं॥ अथ काम्योपवासपरा नियमाः॥
[illegible] दशम्यामेकभक्तस्तु मांसमैथुनवर्जितः। एकादश्यामुपवसेत्पक्षयोरुभयो
रपि। दिवतास्वस्थ चतुर्थ्यंति कामितं चैव सिध्यति। सायमाद्यंतयोरह्नोः सायं प्रातश्च मध्य
मा उपवासफलं प्रेप्सुर्जह्याद्भक्तचतुष्टयं॥ कांस्यं मांसं मसूरं च चणकं कोरदू
षकं। शाकं मधु परान्नं च त्यजेदुपवसन् स्त्रियं॥ कांस्यं मांसं सुरां क्षौद्रं लोभं वि

Indira Gandhi National
Centre for the Arts

तथरसायणम्। ब्यायामंबन्नवासं च दिवास्वप्नमथांजनम्। शिलापृष्टं मसूरं च द्वादश्येता निवेष्न

वः। द्वादश्यां वर्जयेन्नित्यं सर्वपापैः प्रमुच्यते। पुनर्भोजनमध्वानं राज्यामाम मैथुने। उपवा

सफलं हन्युर्दिवा निद्रा च पंचमी॥ दिवा निद्रापरान्नं च पुनर्भोजनमैथुने।

क्षौद्रं कांस्यामिषं तैलं द्वादश्यामष्ट वर्जयेत्॥ एतेषु वाक्येषु कचित्कामितं चैव सिध्यति। क

चिदुपवासफलद्वेषुरिति। कचिदुपवासफलं हन्युरिति फलसंबंधः श्रूयते। ततो विज्ञा ७५

यते। काम्याधिकारकर्त्तव्यता कार्य्यीतियुक्तं चैतन्न्याकाम्यकर्म्मसु सर्वांगोपहारं नैयत्या

त्र जह्याद्यकद्वयं नित्ये काम्ये तु चतुष्टयं। नित्योपवासी यो मर्त्यस्त

यं प्रातः भुजि क्रियां। संत्यजेन्मतिमान्विप्रः संप्राप्ते हरिवासरे। उपवासफलद्वेषु

जह्याद्यकचतुष्टयम्॥ काम्ये विशेषमाह। संकल्प्योदुंबरे पात्रे जलमष्टाक्षरेण

तु अभिमंत्र्य पिबेद्दर्भकांस्यादीन्परिवर्जयेत्॥ अष्टाक्षरेण मंत्रेण त्रिजप्तेनाभि

मंत्रितम्॥ उपवासफलद्वेषुः पिबेत्पात्रगतं जलं। अष्टाक्षरेण मंत्रेण।

विशेषमाह। अज्ञानतिमिरेत्यस्य समाप्यो पोषणं हरेः। द्वादश्यां पारणं कुर्यान्नित्ये

काम्येप्युपोषितः। नित्ये काम्ये चोपोषितः। अज्ञानतिमिरांधस्येति श्लोकं पठित्वा। कृष्ण कृष्ण कृ

पालुस्त्वमगतीनां गतिर्भव। संसारार्णवमग्नानां प्रसीद मधुसूदनेति। चमंत्रमुक्त्वा उपवासम

मर्प्पणं हरये कुर्यात्॥ मंत्रं जपित्वा हरये निवेद्योपोषणं व्रती॥ द्वादश्यां पारणं कु

र्याद्वर्जयित्वा त्वपोतकं॥ पोतकी शाकभेदः। नित्येऽप्ययथाशक्त्या यथा कार्योहिति। अथ श्रु

Indira Gandhi National
Centre for the Arts

शुक्लकृष्णेच ॥ द्वयोरुपवास विषयो विविचारः क्रियते। एकादश्यामुपवसन् पक्षयोरुभयो
रपि। क्षायांयोर्द्वयोर्द्दिष्टं समुक्तिफलतत्सदेव । विष्णुरहस्ये नारदवाक्यम् इन्द्राणि त्रयो
क्तानि नरकानि महद्भ्रशः। यमश्च सदने घोरे यातनायम किंकरैः। यत्किंचिन्न हि यातार्थेय
ममार्गस्थानहद्दा मनसापि विकीर्षन्ति द्वादशीयेनरोत्र माः। तेपि घोरं न पश्यंति
संसारं दुःखसमागरं। शुक्ले कृष्णे वायुस्विवाकृष्णे विष्णुपूजनतत्पराः। एकादश्यां न भुंजीत पक्ष ८०
योरुभयोरपि। यथा सुपूजितो गौरः कृष्णो वा वेदविद् द्विजः। संतारयति दातारं द्वादश्यो
फलतस्तथा। सर्वपापविनाशाय विष्णोः संतोषणाय च। उपोष्य द्वादशी पुण्यां सेवेतोभय
पक्षयोः दर्शश्च पूर्णमासश्च पुण्यतश्च यथा समो। तथा सितासिते पुण्ये द्वादश्यो मु
निभिः स्मृता। यथोत्तरे दक्षिणे वा अयने वैव कीर्तितो। तुल्यं फलमवाप्नोति द्वादश्योस्तु
तथोभयोः। सोमसूर्यग्रहौ पुण्यौ द्वादश्यौ धर्मतः समौ। यथा विष्णुः शिवश्चैव संप्र अभेदः
ज्ञौ मुनिभिः स्मृतौ। तथा सितासिते पुण्ये धर्मतश्च यथा समौ द्वादश्यौ विष्णुवल्लभे।
सायं प्रातर्यथा संध्ये सायं प्रातर्यथाहुती। तथा सितासितो पुण्ये धर्मतश्च यथा समे। इत्या
दीनि बहूनि वाक्यानि शुक्लकृष्णैकादश्योरविशेषेणोपवासपराणि। तत्कथं शुक्लायामेव गृह
स्थोपवासकथनमिति। तथा नित्यत्वाच्च कृष्णाया नैमित्तिकत्वाच्च। तदुक्तं कूर्मपु
राणे। कृष्णपक्षे न मे ख्याता द्वादशी केन हेतुना। किं सा न ते प्रिया देव किं
वा ख्यातुं न युज्यते। यथा कृष्णा तथा शुक्ला द्वादशी मम दा प्रिया। शुक्ला गृहस्थैः

Indira Gandhi National
Centre for the Arts

गृहस्थैः कृष्णैकादशीव्रतं न कुर्यात्

कर्त्तव्या लोगसेता न वर्द्धिनी मुमुक्षुभिस्सर्वथा कृष्णा तेन तेनोपदेशिता ।। एकादश्यां न भुं
जीत पक्षयोरुभयोरपि । ब्रह्मचारी वनारीव शुक्लामेव सदा गृही ।। एकादश्यां न भुं
जीत पक्षयोरुभयोरपि । वनस्थयतिधर्मोयं शुक्लामेव सदा गृही । शुक्लामेव सदा गृहीत्यनेन
गृहस्थस्य शुक्लायामप्राप्त एवोपवासो विधीयते । स च नित्यो वेदितव्यः ।। नित्या
शुक्ला समाख्याता कृष्णा नैमित्तिकी स्मृता । शुक्लापार्थ सदा कार्या न त्याज्या संकटेष्वपि । शु- ८१
क्लायां यस्तु वै भुंक्ते स भुंक्ते किल्बिषं नरः । कृष्णा नैमित्तिकीति । निमित्तं च नैमित्तिकीनि
मित्तं च शयनीबोधिनीमध्यवर्त्तित्वं । शयनीबोधिनीमध्ये या कृष्णैकादशी भवेत् ।
सैवोपोष्या गृहस्थेन नान्या कृष्णा कदाचनेति वचनात् । नान्या कृष्णेत्यत्र वाद्यसमासे स्ताव ।

ज्ञातश्चायं भावः । सामान्यतः पक्षद्वयेपि सर्वेषामविशेषेण भोजननिषेधाद्भोजनमात्रवर्ज
नं सकामगृहस्थव्यतिरिक्तानां पक्षद्वयेप्युपवासजनम् । गृहस्थस्य च सकामस्य शुक्लायामे
व शयनीबोधिनीमध्ये कृष्णायामपि । शयनीबोधिनीमध्ये या कृष्णैकादशी भवेदित्याद्युक्त
त्वात् । पुत्रवतो गृहस्थस्य शयनीबोधिनीमध्ये किं विकृष्य संकल्पयित्वा पोषणं करणीयं ।
[illegible] उपवासनिषेधे तत्स्वरूपं किं विधं कल्पयेत् । न तु पश्यत्युपवासेन उपवासफलं ल
कृष्णैकादश्यां भेदिति । तत्स्वरूपकल्पनापि तत्रैवोक्ता । नक्तं हविष्यान्नमनोदनं वा फलं तिलाः क्षीरमथाम्बु
चाज्यं । यत्पंचगव्यं यदि वापि वायुः प्रशस्तमत्रोत्तरमुत्तरं च ।। निष्कामस्य तु गृहिणोपि
सर्वासु पक्षद्वयासु । शुक्लामेव सदा गृहीत्यादिवाक्ये गृहिपदं सकामोपलक्षकमिति नि

Indira Gandhi National Centre for the Arts

वंशान्तरेष्वप्युक्तं व्याख्यानादिति। तत्र संक्रान्त्यादिनिमित्तोपवासप्रतिषेधाद्वक्तायामपि उपवासनिषेधस्तु॥
गृहस्थस्य कार्यमुपोषणमिति। संक्रान्त्यामुपवासं च कृष्णैकादशिवासरे। चं
द्रसूर्यग्रहे चैव न कुर्यात्पुत्रवान्गृही॥ इंदुक्षये च संक्रान्त्यामसितैकादशीदिने। उप
वासं न कुर्वीत यदीच्छेत्संततिं ध्रुवां। एकादश्यां च कृष्णायां संक्रान्तौ रविवासरे। तथा। पारणे चो
पवासं च न कुर्यात्पुत्रवान्गृही॥ दिनक्षये च संक्रान्तौ ग्रहणे चंद्रसूर्ययोः। उपवासं ८२
न कुर्वीत पुत्रपौत्रसमन्वितः। आदित्यवारे संक्रान्तावसितैकादशीदिने। व्यतीपाते कृते
श्राद्धे पुत्री नोपवसेद्गृही। संक्रान्त्यामुपवासेन पारणेन युधिष्ठिर। एकादश्यां तु कृष्णायां।
ज्येष्ठपुत्रवा नृः ज्येष्ठः पुत्रो विनश्यति। स संक्रान्त्यादिनिमित्तस्योपवासस्य प्रतिषेधो न त्वेकादश्या

दिनिमित्तस्य। तदुक्तं जैमिनिना तन्निमित्तोपवासस्य निषेधोयमुदाहृतः। नानुषंगकृतो ह्य
स्यायतो नित्यमुपोषणमिति। तत्प्रयुक्तोपवासस्य निषेधोयमुदाहृतः। प्र
युक्तस्य प्रयुक्तस्य न विधिर्न निषेधनमिति। तत्प्रयुक्तोपवासस्य संक्रान्त्याद्युपवासविधि
प्रयुक्तोपवासस्यायं निषेध उदाहृतः। न नित्यैकादश्युपवासविधिप्रयुक्तोपवासस्यायं
निषेध इत्यर्थः। दिनक्षये विशेषमाह। उपोषणं तु विद्धायां द्वादश्यां न क्षये सति। पित्रंशे
पं समाघ्राय कुर्याद्वा हरेर्दिने। क्षये सति विद्धायां द्वादश्यां वा उपोषणं कुर्याद्वचनानु
सारात्। संक्रान्त्यादिनिमित्तोपवासस्य संवर्तेनोक्तः श्रमावास्या द्वादशी च संक्रान्तिश्च।
विशेषतः। प्रशस्तास्तिथयो ह्येताः स्तत्र वारस्तथैव च। अत्र स्नानं जपो होमो देवतानां च पूजनं।

Indira Gandhi National Centre for the Arts

भानुवारे संयुक्तास्वेकादशीव्रतं कर्तव्यं॥

उपवासस्तथादानमेकैकंपावनंस्मृतं॥ एकादश्यांयदारामवारस्स्यात्सवितुस्तदा॥
सैवोपोष्यामहापुण्यापुत्रपौत्रविवर्द्धनी॥ भानुवारस्यविशेषःसनत्कुमारोक्तः॥ भानुवारे
णसंयुक्ताकृष्णासंक्रान्तिसंयुता। एकादशीसदोपोष्यासर्वसंपत्करीतिथिः॥ श्राद्धेचविशेषः॥
श्राद्धदिने उपवासनिषेधः श्राद्धंकृत्वात्वयोविप्रोनाश्नंश्चेत्पितृसेवितं। हविष्यंवान्नमश्नीतकथानिपितरस्तथा॥ तदेका
दश्युपवासस्यातिरिक्तविषयं॥ तदुक्तं। उपवासोयदानित्यःश्राद्धंनैमित्तिकंतथा॥ उपवा ८३
संतथाकुर्यादाघ्रायपितृसेवितं॥ तस्माद्दिवसेएकादशीसंपातेपिंडानाघ्रायोपवास
करणीयः॥ मातापित्रोःक्षयेप्राप्तेभवेदेकादशीयदा॥ अभ्यर्च्यपितृदेवांश्चआजि
घ्रेत्पितृसेवितं॥ तस्मात्पाखंडिभिःपापैरालापस्पर्शनंत्यजेत्॥ विशेषतःक्रि

क्रियायोरपकर्षःस्यात्॥ कल्पतरौभोजनपूर्वकालस्योपलक्षणं॥ यदाल्पाद्वा
दशीस्यात्तुअपकर्षोभवेत्तदा॥ प्रातर्माध्याह्निकस्यापितत्रस्यादपकर्षणं॥ य
दाभवेदतिस्वल्पाद्वादशीपारणादिने॥ उषःकालेद्वयंकुर्यात्प्रातर्माध्याह्निकंतथा॥ मतान्तरे
माह्नाकर्तुंसाध्यंयदानालंद्वादश्यांक्षिप्रंपारयेत्॥ क्रतावशौचवत्स्याद्भुंजीतेत्यपरेजगुः॥
अस्यार्थः। यदाद्वादशीसाध्यंकर्तुंनालंप्रातर्मध्यंदिनसोमययोःकर्तव्यंकर्तुमपर्याप्तातदाह्निकं
पारणंकुर्यात्॥ क्रतावशौचवत्॥ यथाक्रतावेकस्थेक्कर्तुरुपवासेभोजनेचैकस्मिन्दिनेकर्त
व्येभुजिकार्येप्राप्तातित्त्वेवानाशितमित्युदकविधानात्॥ भुजिकार्यसिद्धिरुपवाससिद्धि
श्चभवति॥ तथात्राह्निकःपारणेतुभुजिकार्यसिद्धिर्नित्यकर्मोऽनुष्ठानार्थंनशानसिद्धिश्चभवति॥

Indira Gandhi National Centre for the Arts

संध्यादिकं स्वे नित्यं पारणं तु निमित्ततः। अद्भिस्तु पारयित्वाथ नैत्यकान्ते
भुक्तिरिष्यते॥ संकटे विषमे प्राप्ते द्वादश्यां पारयेत्कथम्। अद्भिस्तु पारयित्वाथ पुनर्भुक्ते
न दोषः स्मृतः। अंबरीषप्रति ब्राह्मणानां वचनम्। हरेः पादोदकेः कार्यं पारणं द्वादशी
दिने। पश्चात्कर्माणि कुर्वीत स्वल्पायां द्वादशी रवेः। पारणे परणेत्व प्रतिषिद्धं। वराहपुराणव
प.रा.न. चनात्। तत्र विशेषः कृत्यकौमुदीकारेणोक्तः। पितुः पुत्रश्च यज्ञानं भ्रातुश्चैव तु यज्ञकेऽ। असुरा ८५
न्नमात्तुलान्नं न परान्नं प्रकल्पते। ततश्च पारणे द्वादशी न लंघनीया। महाहानिकरा
ह्येषा द्वादशी लंघिता नृणाम्। करोति धर्महरणम् मातेव सरस्वती। इत्युक्तत्वात्। अ
संताश्यामसमास्थस्तु लक्ष्यतमिकादलम्। आमलक्याः फलं वापि पारणे प्राश्य शुध्यति। एव

मपरोपि विशेषो ग्रंथान्तरात्तु संधेयः। तत्रैकादशी द्वेधा शुद्धा विद्धा च
तत्र शुद्धा संक्षेपतस्त्रिविधा। वृद्धिसाम्यह्रासैः। एवं विद्धापि वृद्धिसाम्यह्रासैस्त्रिविधा। पुनरेकैका।
एकादशी द्वादशी वृद्धिसाम्यन्यूनताभिः प्रत्येकं त्रिविधा भवतीत्यष्टादशधा विभिद्यते। शु
द्धाधिका। शुद्धसमा। शुद्धन्यूना। एवं विद्धाधिका। विद्धसमा। विद्धहीनेति षट्प्रकारैकादशीत
तः शुद्धाप्रकारेषु त्रिषु। विद्धाप्रकारेषु च त्रिषु। एकैका एकादशी द्वादशीतः वृद्धिसाम्यह्रासैः पुन
स्त्रिविधा भवति। शुद्धाधिका द्वादश्यधिका। शुद्धाधिका द्वादशीसमा। शुद्धाधिका द्वादशीहीनेति
शुद्धाधिका त्रिविधा। एवं शुद्धसमा द्वादश्यधिका। शुद्धसमा द्वादशीसमा। शुद्धसमा द्वादशीहीना
एवं शुद्धहीना द्वादश्यधिका। शुद्धहीना द्वादशीसमा। शुद्धहीना द्वादशीहीनेति। शुद्धा नवधा॥

Indira Gandhi National
Centre for the Arts

एवं विद्धाधिकाद्वादश्यधिका। विद्धाधिकाद्वादशी समा। विद्धाधिकाद्वादशी हीनेति। विद्धाधि
का त्रिविधा। एवं विद्धसमाद्वादश्यधिका। विद्धसमाद्वादशी समा। विद्धसमाद्वादशी हीनेति वि
द्धसमा त्रिविधा। एवं विद्धहीनाद्वादश्यधिका। विद्धहीनाद्वादशी समा। विद्धहीनाद्वादशी हीने
ति विद्धहीना त्रिधेत्यष्टादशधा। शिवेनैकादशी शंकरायाथ कथिता। शुद्धा
विद्धा दशधा कश्चिदपि च ततो द्वेधमेकादशीयं प्रत्येकं च त्रिधा सो पुनरपि समतान्यूनताधि ७८
क्ययोगात्पक्षाः प्रत्येकं भिन्नाः पुनरपि षड्भी द्वादशीन्यूनताद्यैश्चैवं धा देवमष्टादश खलु मि
लिताः कल्पनाः संभवति। शुद्धा विद्धा त्रिधा वृद्धि साम्य ह्रासैश्च न त्रिधा।
तत्रैकैकादशी वृद्धिसाम्योनतायुक्‌ तत्र्य वस्थापितेनैव दर्शिता। आद्योपोष्या परौ द्वौ हेयौ

स्८५

द्वौ पयो व्यवस्थिता। २ हिंयत्योरस्त्र वा सु षण्मु पूर्वैव संमता। तिष्टर्धं व्यासु विद्धैव तत्पूर्वैवत्र व्यवस्थि
ते। त्रविद्धैवत्र शेषासु तृतीयासु व्यवस्थितेति। संपूर्णैकादशी यान भवति पर
तः सा समा वा समा वा न्यूना वा ना शिवा श्रंजति हरिदिने द्वादशी सापि चोर्द्धे सर्वे कुर्युः पर
स्यादुपवसनमथ द्वादशीमोर्द्धमेति। प्रा आउत्र द्वितीयामुपवसन्तु जनाः पूर्वमन्ये तु सर्वे य
द्येषा पूर्वविद्धा न भवति परतः सा समा वा समा वा सर्वे कुर्युर्द्वितीयामथ हरिदिवसः पूर्व
विद्धापि प्रायात्र। द्वादश्यां सा त्रिसंस्पृश्यादि भवति परं मोक्षणः पूर्वमध्ये यद्वा विद्धा न चोर्द्धप
रमुपरि भवेत्तत्र सर्वैः पुरस्तात्। पूर्वं विद्धाथवा सा न भवति दशमी द्वादशी वापि चोर्द्धे कार्या
त्रयोपरिष्टान्मुनिजनरनिकरः पूर्वमध्ये तु सर्वैः। विद्धं प्रातर्दशम्या हरिदिनमथ च द्वादशी

Indira Gandhi National
Centre for the Arts

रात्रिशेषेमर्द्धैः पूर्वैतदानीमुपवसेज्जनः प्रीतयेकेशवस्याइति प्राचीनमतमत्रस्थित्योपवा
सेव्यवस्थोच्यते। एवंतेषामष्टादशप्रकाराणांमध्येआद्याद्वादश्याधिक्ययुक्ताधिकैकाद
शीपरोपोष्या। संपूर्णैकादशीयत्रप्रभातेपुनरेवसा। तत्रोपोष्यापरा
पुत्र्यापरतोद्वादशीयदि। संपूर्णैकादशीयत्रप्रभातेपुनरेवसा। तत्रोपोष्याद्वितीया
त्रपुत्रपौत्रप्रवर्द्धिनी॥ संपूर्णैकादशीयत्रप्रभातेपुनरेवसा। वैष्णवीचत्रयोदश्यांघटि ८७
कैकापिदृश्यते। गृहस्थोपिपरांकुर्यात्पूर्वांनोपवसेत्तदा। वैष्णवीद्वादशी। नष्टस्वरांयतिःकुर्या
त्पूर्वांमुपवसेद्गृही। इतिवाक्यात्रयतिविषयिणी। द्वितीयैकादश्युपवासव्यवस्थाकथंनभवती
ति। गारुडनारदीवाक्यद्वयेनाधिकारिविशेषानुल्लेखेनैवद्वितीयैकादश्युपवास

५

विधिश्रवणात्। स्मृतिवचनेनचगृहस्थोपिपरांकुर्यात्पूर्वांनोपवसेत्तदेतिगृहस्थस्यापिपूर्वैकादश्यु
पवासनिषेधान्नयतिमात्रविषयैषाव्यवस्था। अतःसर्वैरपिपरोपोष्या। अतएवत्रयोदश्येकादश्यो
पोष्यापर्योर्गृहियत्योर्व्यवस्थितेः द्वादशीसामयुक्ताशुद्धाधिका द्वादशीहानियुक्ताशुद्धाधिकात्
चाद्यागृहस्थानामुत्तरायतीनामिति। संपूर्णैकादशीयत्रप्रभातेपुनरेवसा। उत्तरा
त्रयतिःकुर्यात्पूर्वामुपवसेद्गृही। तथास्मृत्यन्तरे। संपूर्णैकादशीयत्रप्रभातेपुनरेवसा। लुप्यतेद्वा
दशीतस्मिन्नुपवासःकथंभवेत्। उभयंत्पोष्यंद्वितिथीतत्रविष्णुप्रीणनतत्परैः।
संपूर्णैकादशीयत्रप्रभातेपुनरेवसा। त्रयोदशीनपःकालेउपोष्यातत्रकाभवेत्। उपोष्येद्वेति
थीतत्रविष्णुप्रीणनतत्परैरितिनवाक्यानांवचनान्याभिमेद्वितिथीसंहतेउपोष्येइत्युच्यते। नत्वत्र

Indira Gandhi National Centre for the Arts

गृहस्थयत्यधिकारिभेदेनपृथक्पृथग्व्यवस्था। उत्तरांत्रयतिःकुर्यात्पूर्वोमुपवसेद्गृहीतिहयग
धिकारिभेदेनोपवासविधानात्तसंहृतोपवासः। पूर्णैकादशीयत्रप्रलातेपुनरेव
सापूर्वामुपवसेत्कामीनिःकामस्तूत्तरांसदातत्वनेनवाक्येनसकामनिःकामत्वेनव्यवस्थाकृता।
नतुगृहस्थयतिभेदेन। यदितिपदंनिःकामोपलक्षणम्।गृहिणोप्रायसःसकामत्वात्तस्मा
दनेनापिवचनेनपृथक्कथमुपवासःप्रतीयते।उत्तरांत्रयतिःकुर्यादितियतिपदंनिःकामोप ८८
लक्षणं।गृहस्थोपिफलकामनांविनापरामेवोपवसेत्। निःकामस्तुगृही
कुर्यात्पूर्वेकादशींसदा।सकामस्तुसदापूर्वामितिबौधायनोब्रवीत्।ननुत्रयोदश्यांपारण
प्रतिषेधात्कथमेवं। पारणंतुत्रयोदश्यांयःकरोतिनृपोत्तम।द्वादशद्वाद

शीहर्षेनात्रकार्याविचारणा। श्रूयतेद्वादशीयद्देति।त्रयोदशीतपःकालइतिवाक्या
त्वांद्वादश्यपलावण्ययतिनामुपवासविधानात्त्रयोदशीपारणनिषेधश्चैषविषयः।अतएव
रामुपदिष्टैकादशीषुषड्विधापोष्या।द्वादश्याधिकमुक्ताशुद्धसमा।द्वादशीसाम्यमुक्ताशुद्धस
माद्वादशीहानिमुक्ताशुद्धसमा।द्वादश्याधिकमुक्ताशुद्धहीना।द्वादशीसाम्यमुक्ताशुद्ध
हीनाद्वादशीहानिमुक्ताशुद्धहीना।इत्येताषट्सुपूर्वैवोपोष्या। शुद्धासदास
माहीनासमक्षीणोत्तराधिका।एकादशीमुपवसेत्शुद्धांवैश्रवीतदेति।ननुशुद्धसमायांशु
द्धहीनायांचत्रयोदश्यांद्वादशीसद्भावेशुद्धद्वादश्यामेवोपवासइत्युक्तम्।
एकलिङ्गवचनेयुक्तायदिचद्विपरातिथिः।अथचैकादशीनाष्टिदशम्याबाधसंगताद्वाद

Indira Gandhi National
Centre for the Arts

शीतकलाकाष्ठायद्दिष्यादपरेहनि। द्वादशाद्वादशीहंतिपूर्वेद्युःपारणोक्तमिति।
यदाहद्विगाभिन्येकादशीपरस्मिन्दिवसेएककलिकाभवति। अथवापरदिनेएकादशी
नविद्यते। उत्तरयथापित्रयोदशीदिवसेकिंचिद्वादशीसंभवेशुद्धांद्वादशीमेवोपवसेदिति।
अथवाकश्चिद्विद्धसमायांद्वादश्याधिक्यवत्यांचरितार्थत्वान्नायंविषयः। नचदशम्याव
धसंगतेत्यभिधानात्। नैतत्रविषयंवचनमेतदितिवाच्यम्। एतद्वचनस्यशुद्धैकादशीविषयत्व ८७
संभवात्। उत्पन्नैःशुद्धैकादश्यवरुद्धेउपवासेद्वादशीविद्धालाभात्। नचवाच्यम्। नसाक्षादु
पवासोद्देशेनद्वादशीविधिरपितुपूर्वेद्युःपारणाविधित्वउपवाससंबंधइतिद्वारान्तरेणसं
बंधः। एकादशीमुपवसेन्नशुद्धांवैष्णवीमितिस्कंदपुराणीयवाक्यविरोधेनद्वारान्त

रेणापिद्वादशीविध्यसंभवात्। अथदशम्यावाधसंगतेत्यस्यकथमुत्पत्तिरितिचेन्न। आशंका
परिहारार्थम्। यदाविद्धाधिकातदाप्रथमातिक्रमेकारणाभावात्। प्रथमैकाद
श्यामेवोपवासःकथंनस्यादितिशंकायामिदमुत्तरम्। यद्यपिप्राथम्यात्पूर्वैवोपोष्या। तथा
पिउत्तरादशम्याअसंगता। अतःसैवोपोष्येतिनकिंचिदनुपपन्नम्। एवंशुद्धानवधानिरूपि
ता। विद्धाधुनानिर्णीयते। अस्यासुतिसृष्वेकादशीविद्धैवोपोष्या। द्वादश्याधिक्ययुक्ताविद्धै
ना। द्वादशीसाम्ययुक्ताविद्धहीना। द्वादशीहानियुक्ताविद्धहीनेत्येतासुविद्धैवोपोष्या। एका
दशीन्यूनत्वेतत्सकलाद्वादशीलवेन। उपोष्येकादशीविद्धाऋषिरुद्दालकोऽब्रवीत्।
सर्वत्रैकादशीकार्याद्वादशीमिश्रितानरैः। प्रातर्भवतुवामावायस्मान्नित्यमुपोषणं १

Indira Gandhi National
Centre for the Arts

र्मिति। तत्सूत्रेसत्त्वव्यवस्थिते। अथास्तु तिष्ठ पुष्टेषु एकादश्योर्व्यवस्थिते। द्वादशी साध्ययुक्ता। वि
द्धसमा द्वादशी ह्रासयुक्ता विद्धसमा इत्येतौ एकादश्योः गृहियत्योर्व्यवस्थिते।　　　　　　　　त्र
योदश्यां न लभ्येत द्वादशी विकथं वन। उपोष्यैकादशीतत्र दशमी मिश्रिता पिया। न च नेन कथ
नेन कथं व्यवस्था।　　　　वचनान्तराण्यवस्थावतीर्यते।　　　　दशमी मिश्रिता पूर्वा द्वादश्यो
य दि लुप्यते। एकादश्यां तदा ब्रह्मन्नुपवासः कथं भवेत्। इत्यक पक्षस्योक्तं। शुद्धैव द्वादशी
यां न त्वनुपोष्या मोक्षकांक्षिभिः। सकामैर्गृहिभिः पूर्वा विद्धा पीति विनिश्चयः। इत्यनेन वचने　१०
न गृहियत्योः संबंधावगमात् द्विविधव्यवस्थामधिगच्छामः। शेषाश्च विद्धे वोष्या द्वादश्याधिक्य
युक्ता विद्धाधिका। द्वादशी साम्ययुक्ता विद्धाधिका। द्वादश्याधिक्ययुक्ता विद्धसमे त्येता श्च

विद्धैवोपोष्या। उत्तरैवोपोष्या। द्वादशी हानि युक्तायां गृहियत्योर्व्यवस्थितां विद्धाधिकायां
द्वादशी साम्याधिक्यवत्यां परेत्रेपोषणं विष्णुधर्मेष्वुक्तं। एकादश्यष्टमी षष्ठी द्वितीया च चतु
र्दशी। अमावास्या तृतीया च उपोष्याः स्युः परान्विताः। इति। विद्धसमायां द्वादश्याधिक्यवत्यां
परत्रोपवासः स्मृत्युक्तः। कलार्द्धेनापि विद्धा स्याद्दशम्यैकादशी यदा तदा ह्येकादशीं त्यक्त्वा
द्वादशीं समुपोषयेदिति। ननु विद्धाधिकायां विद्धसमाधिकोत्तरायां च परत्रोपवासः कथ
मुक्तः प्रथमातिक्रमेकारणाभावादिति न वाच्यम्। विद्धैकादश्युपवासस्य दोषवत्तया नि
रस्तत्वात्।　　　　नोपोष्या दशमी विद्धा सदैवैकादशी तिथिः। तामुपोष्य नरो जन्म
पुण्यं वर्षशतोद्भवम्। द्वादश्यां यश्च विद्धायामेकादश्यामुपोषितः। तस्यायुः क्षीयते सत्यं नार
२८　　　　रामा२

दोषंब्रवीमिवः।दशम्यात्नुगतायत्रतिथिरेकादशीभवेत्।तत्रापत्यविनाशःस्यात्परेत्यनर
कंव्रजेत्।दशमीशेषसंयुक्तागांधार्यासमुपोषिता।तस्याःपुत्रशतंनष्टंतस्मात्तांपरिवर्जये
त्।नचैवंविद्धहीनात्रयेपिनविद्धायामुपवासःस्यात्। वचनान्तराविरोधेनविद्धही
नात्रयेविद्धैकादश्याएवोपोष्यत्वात्। पारणायनलभेतद्वादशीयदिकि
ञ्चित्।तदानींदशमीविद्धैवोपोष्यैकादशीतिथिः। द्वादशीतिथिवृद्ध्यापि ९१
यस्मिन्स्यात्परेहनि।दशमीमिश्रिताकार्यानहिदोषोस्तिवेधतः। त्रयोदश्यांयदा
नस्याद्द्वादशीघटिकाद्वयं।दशम्येकादशीमिश्रासैवोपोष्यातदातिथिः। एकाद
शीयदाविद्धासकलाद्वादशीभवेत्।उपोष्यादशमीविद्धाऋषिरुद्दालकोऽब्रवीत्।

एकादशीयदाविद्धाद्वादशीचक्षयंगता।द्वादशीमिश्रितातत्रउपोष्यामुनिसत्तमाइति
विद्धैकादश्युपवासनिषेधवचनानिपुनर्द्वादश्याधिक्यवत्यांविद्धसमैकादश्यांद्वादशीसा
म्यधिक्यवत्यांविद्धसमैकादश्यांद्वादशीसाम्याधिक्यवत्यांविद्धाधिकैकादश्यांविद्धैकाद
श्युपवासनिषेधपराणि। कलार्द्धेनापिविद्धास्याद्दशम्यैकादशीयदि।तदात्वेकादशीं
त्यक्त्वाद्वादशींसमुपोषयेदित्यनेनवाक्येनवेधदूषितायामेकादश्यांसत्यांशुद्धद्वादश्या
मुपवासोविहितः। एकादशीमुपोष्यैवद्वादशीमथवापुनः।विमिश्रांवापिकुर्वीतन
दशम्यायुतांक्वचित्।इत्यनेनवचनेनशुद्धविद्धैकादश्यामुपवासंविधायदशमीवेधदूषित
यामेकादश्यांसत्यांशुद्धद्वादश्यामुपवासंविधायामपिअशक्तोनदशम्यायुतांक्वचिदितु
रा२ एकादश्यांद्वादशीमिश्र समस्तस्यामुपवासंविधायाविमिश्रानामितिसाधारणे दशमीविद्धा

Indira Gandhi National
Centre for the Arts

क्रम्॥एवंविद्धहीनात्रयेपूर्वत्रदशमीमिश्रैकादश्यामुपवासोनयुक्तः।दशमीवेधदुष्ट
त्वात्॥नापुनरत्र।द्वादश्यामुपवासः।तथाचदयात्पूर्वंप्रविष्टत्वेनशुद्धद्वादशीत्वात्सावाम॥
नस्येवंविधायांद्वादश्यामुपवासविधायकंवचनमस्तितेनसर्वदोपवासवाधशक्तोवि
द्धैकादश्युपवासविधायकवचनबलेनविद्धैकादश्यामेवोपवासइतिनिश्चीयते।द्वाद
श्याधिक्यवत्यांतुविद्धसमायांशुद्धद्वादशीसंभवात्तस्यामेवोपवासः।द्वादशीसाध्याधि
क्यवत्यांविद्धाधिकायांमिश्रैकादश्युपवासविधायकवचनसद्भावान्मिश्रायामेवोप
वासः।ननुद्वादशीह्रासवत्यांविद्धाधिकायांव्यवस्थेत्युक्तम्।तत्रकिंकारणम्।अथद्वाद
शीह्रासवत्यां।विद्धसमायोव्यवस्थापनेयत्कारणमुक्तंतदेवकारणमितिचेन्न।नशुद्धैवद्वा १७

दशीरात्रिरितितत्रतत्रव्यवस्थाकारणम्।अत्रद्वादश्येकादशीमिश्रानशुद्धेतिनतेनव्यवस्था
सिद्धिः।तस्मादव्यवस्थाकारणंवक्तव्यं। द्वादशीसंगतायत्रलवत्येकादशीकला।दिनद्व
येपिसापुण्यानदशाध्यायुताक्वचित्।द्विस्पृगेकादशीयत्रतत्रसन्निहितोहरिः।पुण्येऽत्रद्वय
तथोक्तंत्रयोदश्यांतुपारणमित्यादिवाक्यैःपरत्रोपवासःप्रतीयते।एकादशीद्वादशीचरा
त्रिशेषेत्रयोदशी।अहस्त्र्यहस्पृगहोरात्रंनोपोष्यंतत्सुतार्थिभिः।एकादशीद्वादशीचरात्रिशे
षेत्रयोदशी।उपवासंनकुर्वीतपुत्रपौत्रसमन्वितइत्यादिवाक्यैर्गृहिणःपरत्रोपवासप्रति
षेधात्पूर्वत्रोपवासःप्रतीयते।पारिशेष्याद्यतीनांपरत्रोपवासइतिव्यवस्थासिद्धिः।न
त्वेकादशीयदाविद्धाद्वादशीचक्षयंगता।क्षीणासाद्वादशीज्ञेयानक्तंतत्रविधीयतइति

Indira Gandhi National
Centre for the Arts

वाक्याह्निनक्षयेनक्तंविहितं। एकादशीयदाविद्धाद्वादशीचक्षयंगता। दानंवाप्ये
कलक्तंवायद्वाकुर्यादयाचितमिति। अनेनवचनेनदानादिकंविहितंतस्माद्विरुद्धंथ
वस्थापनमितिचेन्न। उपोष्यैकादशीनित्येपक्षयोःशुक्लकृष्णयोः। एकादशीसदोपो
ष्यापक्षयोःशुक्लकृष्णयोरित्यादिविहितैर्वचनविहितमुपोषणम्। दिनक्षयेपोवाप
र्येणगृहियत्योर्व्यवस्थापितंतेनोपोषणंवाधितुंनशक्यं। एकभक्तादिविधयस्त्वशक्तविष ५३
यानक्तविध्यनुवादकाइतिनविरोधः। नन्तुकलाकाष्ठामुहूर्तंवायदिचेन्नपरेहनिद्वा
दशाद्वादशीहीनेतित्रयोदश्यांतुपारणमिति। एकादशीमुपोष्यैवद्वादशीपारणंस्मृतं। त्रयो
दश्यांनतत्कुर्याद्द्वादशीद्वादशीक्षयात्। उपोष्यैकादशीयस्तुत्रयोदश्यांतुपारणं

करोतितस्यनश्यंतिद्वादश्योद्वादशैवतुपारणंत्रयोदश्यांयःकरोतित्युपोषणम्। द्वादशा
द्वादशीहीनिनाचकार्याविचारणा। इत्यादिमत्स्यकूर्मस्कंदलविष्णुपुराणवचनैस्त्रयोदश्यां
पारणप्रतिषेधात्कथंहितीयैकादश्युपवासः। नचत्रयोदश्यांसकृद्वाल्पमश्नीयादुप
वासस्वस्मोस्त्वेन्न। इतिवाच्यं। कथंविद्धैकादश्यामुपवासइतिवाच्यम्। अविद्धापिनिषे
धेष्वेन्नलभ्येतयदातिथिः। मुहूर्तैःपंचभिःविद्धायाह्यप्येकादशीसर्वेदितिवचनाद्दीरादि
आशानमेकादशीव्यतिरिक्तविषयम्। यद्यविद्धानलभ्येतत्तिथ्योक्ता
फलाधिकं। नपश्चाद्योपवासीस्यादुपवासोनलुप्यते॥ ॥ केचित्तुनरेकादशीमष्टधाशुद्धा
विद्धभेदेनवर्णयंति एकादशीद्विधाशुद्धविद्धभेदाद्विधाचते द्वादश्यांसदासद्धा
८२ ७२

Indira Gandhi National
Centre for the Arts

वा॥ प्रत्येकं ताः पुनर्द्विधा परेद्युः द्वादशीलावालावाभ्यामित्थमष्टधा॥ तत्र प्रथवक्षापनमप्यन्य
थावर्णयंति। तद्विज्ञानेश्वरयोगिप्रभृतिभिरनादृतवान्न सिद्धा न्तितमिति। तत्रैव चतुर्थ्यवछामाज्ञ
प्र चतुर्थ्युपोष्या पूर्वैव परो ह्याद्यासु संगताः। इत्युक्षविरेप्रती त्यामेमे ष्टं विज्ञाने योगिनः। वा॥
क्यान्तर विरोधेनन विमर्द्दसहं यतः। एकादशी शुद्धिवेधयोगा द्विधा लव तिप्र
रुणोदयकाला द्वितीय सूर्योदयात्तं वर्त्तमाना। ताशुद्धिः। दशमीयोगो वेधः। शुद्धिवेधयो॥ ९४
गात्। शुद्धिवेधवशात्तेव शुद्धिवेधने द्वादश्यां सत्त्वादसत्त्वाच्च द्विधा। द्विप्रकारे तेत्व
प्रत्येकं द्वादश्याश्च विद्यमानत्वा विद्यमानत्वाभ्यां द्विविधे इत्यर्थः॥ ताः परेद्युस्त्रयोदश्यो
द्वादश्यां लावालावाभ्यां प्रत्येकं द्विधा। शुद्धा द्वादश्यां सती शुद्धा द्वादश्यामसती त्येताश्च



तस्त्रयोदश्यां द्वादश्यपलावादलावाच्च प्रत्येकं द्विधा द्विप्रकाका इत्यर्थः। इत्थमनेन प्रक
रेणाष्टधा। अष्टप्रकारा। तत्र चतुर्थी पूर्वैवोपोष्या। शुद्धैकादशी द्वादश्यामसती त्रयोदश्यां द्वा
दश्यलाववती चतुर्थी सा पूर्वैवोपोष्येत्यर्थः। अन्यासु सप्तस्वेकादशीषु परैवोपोष्या। द्वादश्यां
सती त्रयोदश्यां द्वादशीलाववती। शुद्धा प्रथमा। द्वादश्यां सती त्रयोदश्यां द्वादश्यलाववती॥
शुद्धा द्वितीया। द्वादश्यामसती त्रयोदश्यां द्वादशीलाववती। शुद्धा तृतीया। द्वादश्यां सती त्रयो
दश्यां द्वादशीलाववती। विद्धा पंचमी। द्वादश्यां सती त्रयोदश्यां द्वादश्यलाववती विद्धा षा
ष्ठी। द्वादश्यामसती त्रयोदश्यां द्वादशीलाववती विद्धा सप्तमी। द्वादश्यामसती त्रयोदश्यां द्वा
दश्यलाववती विद्धा अष्टमी। इत्येतास्वपरा उपोष्याः। तत्र प्रथमद्वितीययोः परैवोपोष्येत्य

Indira Gandhi National Centre for the Arts

त्वप्रमाणं स्मृतावुक्तं। सर्व्वेचैकादशी कार्या द्वादशी मिश्रिता न चेत्॥ प्रातर्भवेत्तु वा मा वा यतो नि
त्यमुपोषणमिति। द्वादशी मिश्रिता कार्या सर्व्वत्रैकादशी तिथिः। द्वादशी च त्र
५ योदश्यां विद्यते यदि वा न वा। तृतीया परैवोपोष्या। एकलुप्ताच संयुक्ता यदि द्व
द्विपरा तिथिः। अथ वैकादशी नास्ति दशम्या चाथ संगता। कलाकाष्ठा द्वादशी च यदि स्याद
परेहनि। द्वादश्यां द्वादशी हंति पूर्व्वस्मिन् पारणे कृत इति। पंचमी षष्ठ्या परैवोपोष्येति। ६६ ९५
द्वादश्यां द्वादशी हंति पूर्व्वविद्धामुपोषिता। तस्मात्सर्व्वप्रयत्नेन पूर्व्वविद्धां विवर्जयेत्। स
प्तमष्टम्योः परोपोष्येति। नोपोष्यो दशमीविद्धा सदैवैकादशी तिथिः। तामुपोष्य
नरो जह्यात्पुण्यं वर्षशतोद्भवम्। कलार्द्धेनापि विद्धा स्याद्दशम्यैकादशी यदि। तदा ह्येकाद

शीं त्यक्त्वा द्वादशीं समुपोषयेत्। आनर्तीयमतं योगि विज्ञानेश्वरप्रभृतिभिर्निर्दिष्टं यस्माद्विमह
महं न स्यादिति। वाक्यान्तरविरोधात्। संपूर्णैकादशी यत्र प्रभाते पुनरेव
सा। उत्तरां तु यतिः कुर्यात्पूर्व्वामुपवसेद्गृही॥ तथा स्मृत्यन्तरेपि। संपूर्णैकादशी यत्रेत्यादिभि
र्व्वचनैर्गृहियत्योर्विषयव्यवस्था प्रतीयते। अतो द्वितीयतृतीययोः परत्रैव सर्व्वेषामुपवास इ
ति पक्षो न युक्तः। ननु सर्व्वेचैकादशी कार्येति द्वादशीमिश्रिता कार्येति। एकादशी च संयुक्ते
ति वचनैः सर्व्वेषां परत्रैवोपवास इति प्रतीयते। तत्कथमयुक्तमिति चेन्न। आद्येवचने
यतिविषयेप्युपपन्नेः। तृतीये विद्धसमद्वादश्याधिक्यविषयत्वेन चरितार्थत्वमिति पूर्व्वमुक्तमेव। त
था परेद्युर्द्वादश्यभावेपि विद्धाधिका षष्ठी सा परैवोपोष्या सर्व्वैरित्यपि पक्षो न युक्तः॥

Indira Gandhi National Centre for the Arts

श्चैवापरेद्युर्द्वादश्यभावसंभवति।ज्ञासतःसाध्यतथा।तत्रोत्तरस्मिन्पक्षेसर्वेषांपरत्रैवोप
वासइत्युक्तं।आद्यपक्षेद्वादशीसंमिश्रेत्यादितिवचनैःपरत्रैवोपवासविधायकैरेकादशी
द्वादशीवेतिवचनैर्ग्रहीणः।परत्रैवोपवासनिषेधकैरव्यवस्थायाविधानात्।सर्वेषांपरत्रै
वोपवासायोगात्।द्वादश्यांद्वादशीहंतीतिकूर्मपुराणवचनम्।द्वादश्यामसतीत्रयोद
श्यांद्वादशीतावदवती।विद्धासप्तमी।द्वादश्यामसतीत्रयोदश्यांद्वादश्यभावदवती।विद्धाअ
ष्टमी।सापरेवोष्येतिपक्षोनयुक्तः।द्वेधाहिद्वादश्यामेकादश्यभावोज्ञासतःसाध्यतथा।त ९६
त्राद्यपक्षेसर्वेषांनपरत्रैवोपवासः।सर्वत्रैकादशीकार्येति।एकादशीनलभ्येतेतिवचनद्व
येनसर्वेषांविद्धायामेवोपवासविधानात्।द्वितीयकल्पेनसर्वेषांपरत्रैवोपवासः।द्वाद

शीमिश्रितात्पुपक्रम्यशुद्धैवैकादशीराजन्नोपोष्यादशमीविद्धेतिवचनंयतिविषयेप्युपपन्नं
तस्मात्सर्वोक्तपरएवपक्षोन्याय्यः।शंकराचार्यादिसंमतत्वादितिसिद्धं।एकादशीशुद्धाभेदेनद्वे
धानिरूपिता।तत्रकीदृशीशुद्धाकीदृशीविद्धा। अरुणोदयमारभ्यदशमीसंयुक्ता
विद्धा।तद्रहिताशुद्धा। प्रतिपत्प्रभृतयःसर्वाउदयादुदयाद्रवेः।एकादशीति
थिर्ज्ञेयावैनतेयोदयावधि।विनतेयोदयंअरुणोदयम्। चतस्रोघटि
काःप्रातररुणोदयउच्यते।यतीनांस्नानकालोयंगंगांभःसदृशःस्मृतः। उदयात्प्राक्
चतस्रस्तुनाडिकाअरुणोदयः।तत्रस्नानंप्रशस्तंस्यात्सहिपुण्यतमःस्मृतः। आदित्यो
दयवेलायांप्राङ्मुहूर्तद्वयान्विता।सैकादशीतुसंपूर्णाविद्धान्यापरिकीर्तिता।

Indira Gandhi National Centre for the Arts

अरुणोदयकाले तु दशमी यदि दृश्यते। सा विद्धैकादशी तत्र पापमूलमुपोषणम्॥ अरुणोद
यवेलायां दशमीसंभवो भवेद्यदि। दुष्टत्वं तत्र यत्नेन वर्जनीयं नराधिप॥ दशमीमेष
संयुक्ता यदि स्यादरुणोदयः। नैवोपोष्यं वैष्णवेन तद्दिनैकादशीव्रतं। वैष्णवस्य हि
परमापदमापन्नो हर्षे वा समुपस्थिते। नैकादशीं त्यजेद्यस्तु यस्य दीक्षास्ति वैष्णवी॥ समा
त्मा सर्वजीवेषु निजाचारादविप्लुतः। विष्ण्वर्पिताखिलाचारः स हि वैष्णव उच्यते। अत्र यद्यपि ९७
नारुणोदयवेधः संभवति तदानीमेकादश्युपवासः। सूर्योदयात्प्राक् मुहूर्तद्वया
न्वितैकादशी त्यक्तव्या। तच्च स्मृतिपुराणादिविरुद्धं। तथा सति च षष्टिदण्डात्मिका तिथिः
स्यात्॥ षष्टिनाड्यो हि वै तिथिः। आदित्योदयवेलाया आरभ्य

षष्टिनाडिका तिथिरिति। तेन चित्रं अहोरात्र इति। न च वाच्यं तिथिवृद्धौ षष्टिना
डिकात्वो तिथिर्भवतीति। यतस्तिथिर्वृद्धे वर्द्धते न ह्रासे तस्मान्नारुणोदयवेधः संभवतीति चेत्
तथापि संपूर्णायामेव तिथावरुणोदयवेधाङ्गीकारात्। तिथ्यन्तरपेक्षया एतच्चावैलक्षण्या
त्। अरुणोदयमारभ्य पुनः सूर्योदयावधि संपूर्णैकादशी ज्ञेया नैवान्या
तिथिरीदृशी। प्रतिपत्प्रभृतयो ह्येता उदयादुदयाद्रवेः। संपूर्णा इति वि
ख्याता हरिवासरवर्जिता इति। अत्र केचिदरुणोदयादारभ्य संदिग्धादिभेदेन या काचिद्दश
मी विद्धैकादशी। तां सर्वां परित्यज्य द्वादश्यामुपवासस्त्रयोदश्यां पारणमिति वर्णयन्ति। विद्धा
नुग्रहवचनानि पुनर्दशम्येकादशी तिथित्रययुक्ते दिनरूपे उपवासं विदधतीति च वदन्ति

Indira Gandhi National Centre for the Arts

न्नि। तथाविधायाविद्धाया नारदेनोपोष्यत्वाभिधानात्। दशमीशेषसंयुक्ता नोपोष्यै
कादशी तिथिः। एकादश्यां तु विशेषे द्वादशी चेन्न दृश्यते। दृश्यते चेत्सोपोष्येत्यर्थोऽनुक्तो भव
ति। पुनस्तत्रैवोक्तम्। यदि दैवात्तु संमिश्रादेकादश्यां तिथिर्यम। तत्रैकादशतं पुण्यं द्वादशी
पारणे भवेत्। द्विस्पृगेकादशी यत्र तत्र सन्निहितो हरिः। तामेवोपवसेत्काममका
कामो विष्णुतत्परः। या दशमीं द्वादशीं स्पृशति सैकादशी द्विस्पृक्। दिनक्षयमृते देवि ९८
नोपोष्या दशमीयुता। सैवोपोष्या सदाथापरतश्चेत्त्रयोदशी। यस्मिन्दिनक्षये त्रयोदश्यां
द्वादशी सा नोपोष्येत्यर्थोऽनुक्तम्। तस्माद्यथोक्त एव पक्षो न्याय्य इति।
ऋक्षेण द्वादशीयुक्तेति। युग्मविधायकवाक्यादेकादशीयुक्ताया अस्या

श्रवणद्वादश्यां परमेतावानेव विशेषः। कदाचिदेकादशीविद्धा श्रवणयुक्ता द्वादशी। कदाचि
दविद्धा। यदा त्वेकादशीयुक्ता श्रवणद्वादशी भवति तदैकेनैवैकादशीव्रतेन द्वादशीव्रतसिद्धिः
द्वादश्यां शुक्लपक्षे तु नक्षत्रं श्रवणं यदि। उपोष्यैकादशीं तत्र द्वादश्यां पूजयेद्ध
रिम्। द्वादशी श्रवणस्पृष्टा स्पृशेदेकादशीं यदि। स एव वैष्णवो योगो विष्णुशृंखलसंज्ञकः। तस्मि
न्नुपोष्य विधिवन्नरः प्रक्षीणकल्मषः। प्राप्नोत्यनुत्तमां सिद्धिं पुनरावृत्तिदुर्लभाम्।
याः काश्चित्तिथयः प्रोक्ताः पुण्या नक्षत्रयोगतः। तास्वेव तद्व्रतं कुर्याच्छ्रवणद्वादशीं विना। अयम
र्थः। याः काश्चित्तिथयो येन केनचिन्नक्षत्रयोगेन विशेषेण योगे पुण्याः प्रोक्ताः तासु यद्विहितं व्र
तं तत्तास्वेव कुर्यात्। न तिथ्यन्तरे। नक्षत्रयुक्ते। यथा फाल्गुनशुक्लद्वादशी पुष्यर्क्षेण युक्ता गो

Indira Gandhi National
Centre for the Arts

विद्द्वादशीनामतस्यामुपवासव्रतं विहितं तत्रस्यामेव श्रवणान्वितायां कुर्यात् न तु श्रवणान्विता
यामेकादश्याम् । सोयं श्रवणद्वादशीं विना नियमः । श्रवणद्वादशीव्रतं तु श्रवणैकादश्यामपि भ
वतीत्यर्थः । द्वादश्यांसे विधिः प्रोक्तः सक्तानां विजयप्रदाय
श्रवणेन युधिष्ठिर । सर्वपापप्रशमनः सर्वसौख्यप्रदायकः । एकादशी यदा तु स्यात् तु श्रवणेन सम
न्विता । विजया सा तिथिः प्रोक्ता भक्तानां विजयप्रदा । यदा तु एकादश्यां संपूर्णत्वेन द्वयम् उपवा ९९
सस्तदा श्रवणद्वादश्यां च पृथगुपोषणीये । एकादशीमुपोष्यैव द्वादशीमप्युपोषयेत् न
चात्र विधिलोपः स्याद् उभयोर्देवता हरिः । अयमर्थः । असमाप्तव्रतं पूर्णं नैव कुर्याद् इतरं त्वमिति
वचनात् । द्वादश्यां पारणायाः प्राप्तत्वेऽपि व्रतस्यासमाप्तेः कथं न विधिविलोपः पारणानन्तरं व्रते

स्मृतमित्यत उक्तवान् । तत्राह उभयोर्देवता हरिरिति । श्रवणैकादश्याः श्रवणद्वादश्याश्च हरि
रेकएव देवता यतः । इयांस्तु विशेषः । यच्छ्रवणैकादश्यां वामनो हरिः पूजनीयो द्वादश्यां तु जना
र्दन इति । उपवासद्वयाशक्तस्त्वेकादश्यां भुक्त्वा द्वादशीमेवोपवसेत् । एवमेकादशीं तु
क्त्वा द्वादशीं समुपोषयेत् । पूर्वोपवासजं पुण्यं सर्वं प्राप्नोत्यसंशयम् । वाक्यान्तरं च । उपोष्य द्वाद
शीं पुण्यां विष्णुऋक्षेण संयुताम् । एकादश्युद्भवं पुण्यं नरः प्राप्नोत्यसंशयम् । श्रवणद्वादश्यां
पृथगुपोषणं त्रयोदश्यां पारणं न विरुद्धम् । श्रवणर्क्षेण संयुक्ता द्वादशी यदि लभ्यते । उपो
ष्या द्वादशी तत्र त्रयोदश्यां तु पारणम् । एकोपवासपक्षे तु द्वादश्याम् । एका
दशी यदा तु स्यात् तु श्रवणेन समन्विता । विजया सा तिथिः प्रोक्ता भक्तानां विजयप्रदा । तिथिनक्ष



Indira Gandhi National Centre for the Arts

त्रयोगेत्रउपवासोयदास्वेन्नातावदेवस्तोकंध्येयावदेकस्यसंक्षयः। विशेषेणमहीपालश्र
वणंवर्द्धतेयदि। तिथिक्षयेनलोकस्थंद्वादशींनैवलंघयेत्॥
वालखदुकुलकेरववंद्रशोणिपालजटमल्लविलासेश्रीधरस्यकृतिनःकृतिरेषासंत
तंकृतिमुदेसमुदेतु।

शुक्लपक्षेत्रयोदशीपू १००
र्वविद्धाग्राह्या। त्रयोदशीप्रकर्तव्याद्वादश्यासहितामुने। नतुविद्धानकर्तव्यादर्शापूर्णोक
दाचनेति। ब्रह्मवैवर्त्तवचनात्। द्वितीयापंचमीवेधाद्दशमीचत्रयोदशी।
एताःपरयुताःपूज्याःपराःपूर्वेणसंयुताः। इतिनिगमवाक्यात्। अनंगत्रयोदशीचपूर्वविद्धे

४ कृष्णपु

वग्राह्या। कृष्णाष्टमीबृहत्तल्पासावित्रीवटपैतृकी। अनंगत्रयोदशीरंभाउपो
ष्याःपूर्वसंयुताइति। तत्रशुक्लपक्षचतुर्दशीपरविद्धाग्राह्या। चतुर्दश्या
चपूर्णिमेतियुग्मबोधकनिगमवाक्यात्। शुक्लपक्षेष्टमीचैवशुक्लपक्षेचतुर्दशी। पूर्वविद्धा
नकर्तव्याकर्तव्यापरसंयुते। इतिस्मरणात्। शुक्लपक्षचतुर्दशीतुपूर्वविद्धैवोपोष्या। कृष्णप
क्षेष्टमीचैवकृष्णपक्षेचतुर्दशी। पूर्वविद्धैवकर्तव्याःपरविद्धानकर्हिचिदितिवचनात्। त
त्रापिशिवरात्रिचतुर्दश्यांविशेषः। सापुनःप्रदोषव्यापिनीग्राह्या। प्र
दोषव्यापिनीग्राह्याशिवरात्रिःशिवप्रियैः। रात्रौजागरणंयस्मात्तस्मात्तामुपोषणं। तथा। कृष्णा
उन्मा
ष्टमीस्कंदषष्ठीशिवरात्रिचतुर्दशी। एताःपूर्वयुताःकार्यास्तिथ्यन्तेपारणंभवेत्।

तस्मा२

Indira Gandhi National Centre for the Arts

ष्टमीरोहिणीच शिवरात्रिस्तथैव च। पूर्वविद्धैव कर्तव्या शिवरात्रिर्बलेर्दिनं॥ माघासित
भूतदिनं हि राजन्नुपैति योगं यदि पंचदश्या। जयाप्रयुक्तां न तु तत्र कुर्याच्छिवस्य रात्रिं प्रियकृ
च्छिवस्येति वाक्यात्त्रयोदशीविद्धाया निषेधात्पूर्ववचनविरोधः॥ अत्रेयं व्यवस्था। त्रयो
दशी यदा देवि दिनभुक्तिप्रमाणतः। जागरे शिवरात्रिः स्यान्निशि पूर्णा चतुर्दशी॥ इति वाक्यात्त्र
योदश्यस्पृष्टप्रदोषा यदा चतुर्दशी रात्रिर्भवति तदोपवासजागरणादिकं करणीयम्॥ यदि १०१
चतुर्दश्या निशा त्रयोदशीमिश्रा भवति तदा तस्यां न शिवरात्रिव्रतं करणीयमिति। तत्रैवेद
मुपतिष्ठते जयाप्रयुक्तां न तु तत्र कुर्याच्छिवस्य रात्रिं प्रियकृच्छिवस्येति। त्रयोदशीसंबंधस्य रा
त्रौ प्रतिषेधनात्॥ एतदुक्तं भवति। यदा द्वितीयदिवसे पारणायोग्यस्तिथ्यन्तो न स्यात्तदा पूर्वे

ओ पोष्या यदा पुनर्द्वितीयदिने प्रदोषव्यापिनी चतुर्दशी भवति तदा जागरोपवासादौ द्वितीया
ग्राह्या। यदा पुनश्चतुर्दशी दिनद्वयेपि प्रदोषस्पर्शिनी तदा परोपोष्या। यदि पुनः पूर्वोपोष्येत
तदोत्तरस्मिन्दिवसे दिवा तिथ्यंतस्य रात्रावज्ञातोपारणं प्रसज्येत। तत्तु प्रतिषिद्धं। सर्वेष्वेवोपवा
सेषु दिवा पारणमिष्यते। अन्यथा प्राप्यहानिः स्यात्कृते धारणपारणे॥ सा चास्तमनपर्य
न्तव्यापिनी चेत्परेऽहनि। दिवैव पारणं कुर्यादपारणेनैव दोषभागिति। तद्दिनद्वये समनाद्दे
ता। किंचान्नोडीविषयं भवेद्यत्त्रयोदश्याः कृतघ्नानामहानिशा। शिवरात्रिव्रतं तत्र कुर्याज्जाग
रणं तथेति। वचनविरोधो भवतीति चेन्न। महानिशावेधोपि यामः। किं पुनश्चतुर्नाडीवेध इत्य
त्यपरं तद्वचनम्। अन्यथा त्रयोदश्यपि सर्गे सूर्येव न स्पृष्टेव नाडिष्वा कृतविद्धा उपायतत्र शिवरात्रि

व्रतं चरेदिति वाग्निपुराणवाक्यविरोधः स्यादिति। यदा तु न दिनद्वयेपि अस्तमयोर्द्ध्वं वा त्रिमु
हूर्त्ता तिथिश्चतुर्द्दश्या न प्राप्ता तदा कृतोपवासः। पूर्वोक्ते स्मिन्नेव दिवसे तथा ... शु
येऽन्ने नवनाडीषु भूतविद्धा त्रयोदशी। शिवरात्रिव्रतं तत्र कुर्याज्जागरणं तथेति। नन्वत्र शिवरा
त्रिव्रते भूतां कामविद्धां विवर्जयेत्। जयाप्रयुक्तो न तु तत्र कुर्यात् द्विवर्षरात्रिं प्रियफल
ह्वि चथीति। वचनेन रात्रौ त्रयोदशी वेधप्रतिषेधात् कथमियं व्यवस्थेति चेत्। संक्षेपतः कि १०२
ञ्चिद्वाक्यपर्यालोचना ह्यात्रौ त्रयोदशीसंबंधेन दिनद्वयेपि प्रदोषगामित्वाभावे चतुर्द्दश्या
अलाभे शिवरात्रिव्रतं कर्त्तव्यमित्येतद्विधानपरं प्रागुक्तं वचनमित्यवगंतव्यम्। इहा
पि दिवा तिथ्यन्तर्गते संस्तवे दिवा पारणं विधेयमिति ...

तथा साडपदश्चाने चतुर्द्दश्यो द्विजोत्तमा पौर्णमास्यां समायो
गे व्रतं चानन्तकं चरेत्। अथवा पूर्वमेकस्य कर्मसमयव्यापित्वमित्यन्तमेवेति। यस्याप्येकल
क्रतरूपत्वादिति। शुक्लपक्षेष्टमी चैव शुक्लपक्षे चतुर्द्दशी। पूर्वविद्धा न कर्त्तव्या कर्त्तव्या
परसंयुता व्रतोपवासनियमे घटिकैकापि या भवेत्। सा तिथिः सकला ज्ञेया विपरीता तु
पैतृके इति वचनाद्दैवकार्यत्वाच्चेयमुदयसमयगामिनी ग्राह्या। ... कृष्णपक्षे त्रयोदशी ए
ग्राह्या। प्रतिपद्यप्यमावास्येति युग्मवाक्यत्वात्। पक्षाष्टमी चामावास्या कृष्णपक्षे त्रयोदशी। ए
ताः परयुताः कार्याः पराः पूर्वेण संयुता इति वाक्याच्च परा विततया उपोष्यत्वात् विधानात् ए
त्रे ... एकादश्यष्टमी षष्ठी पौर्णमासी चतुर्द्दशी। अमावास्या तृती

Indira Gandhi National Centre for the Arts

यावत्ताउपोष्याः पराश्विताः इति विष्णुपुराणात् इयं च सावित्रीव्रतव्यतिरिक्तविषया य
दपि ब्रह्मपुराणवचनं चतुर्दश्येकादश्यमावास्या पूर्वविद्धा तथाष्टमी पूर्णिमापरविद्धा च नो
पोष्या तिथिपंचकमिति तत्सावित्रीव्रतातिरिक्तविषयम्॥
होलिका पूर्णिमा तु सायाह्नव्यापिनी ग्राह्या सायाह्ने होलिकां कुर्यात् पूर्वाह्ने क्रीडनं गवां सी
पंदश्यास्तदोषेतु एष संधर्मः सनातन इति स्मरणात् तत्र तत्र विशेषश्रवणात् तत्र कालव्यापि 
त्वस्यविवक्षितत्वात्। सायाह्ने प्रहरद्वयाद्र्ध्वं प्रहृत्तातदाराज्ञोलंघ्यं परिहृत्य होलिका
पूजा कार्या। भद्रायां महादोषश्रवणात्। भद्रायां दीपिता होली राष्ट्रदाहं करो
ति वै नगरस्य च नैवेष्टा तस्मात्तां परिवर्जयेत्। तथा भद्रायां द्वे न कर्तव्ये श्रावणी फाल्गुनी

तथा। श्रावणी नृपतिं हन्ति ग्रामं दहति फाल्गुनी। दिनार्द्धात्परतो वा स्यात् फाल्गुनी पूर्णिमा यदि
रात्रौ भद्रावसाने च होलिकां तत्र दीपयेत्। सार्द्धयामद्वयं वा स्याद् द्वितीये दिवसे यदि प्रतिपद्
र्द्धमाना पितदा सा होलिका स्मृता। फाल्गुन्यां फाल्गुनीयोगे यद्युदेत् सुडुनायकः। विष्टिदोषं प
रित्यज्य होलिकां तत्र दीपयेत्। फल्गुयोगप्रदीप्ता च होलिका सुखदा मता। सर्वसौमंगलायेह
संवत्सरहितैषिणी इति विशेषो द्रष्टव्यः। फल्गु पूर्वफल्गुनीनक्षत्रं। एवं प्रतिपद्दीपनसमये भ
द्रवति सा तु सुतरां परिहार्या। वह्नौ वह्निं परिहरेदिति वचनात्। वह्नौ होलिकायां वह्निं प्रति
पदं वर्जयेदित्यर्थः। वचनान्तरं च। प्रतिपद्भूतभद्रासु यार्चिता होलिका दिवा। संवत्सरं तु
तद्राष्ट्रं पुरं दहति सा द्भुतं ततः। प्रतिपद्युत्तरदिने होलिकादहनं कुर्यात् इति। सायाह्ने वह्नि

Indira Gandhi National
Centre for the Arts

देवानामायंजायतोततोरुद्रासङ्गावमवधार्यतद्वसामेरात्रोप्रतिपद्दैवंच वर्ज्जयित्वाकर्त्त
ह्र्हत्त्वपातथारेत्तासाविद्धावटश्च
ग्रेतिसिद्धम्।
र्विकाजन्माष्टमीवभूताच कर्त्तव्यासंमुखा तिथिः।हृद्हत्तपापफलद्वितीयारंत्ताष्टतीयाभू
ता शिवचतुर्दशी।संमुखासायाह्नव्यापिनी। शिवाचशिवदुर्जोच्दुसेराचङ्कताशनी
वत्सपूजावटश्चैव कर्त्तव्याःप्रथमे ह नि। इति विशेषवचस्थापना पूर्वविद्धायाह्या।तथोक्त
पूर्वविद्धाचतुर्द्दश्यांकार्त्तिकस्यासितेतरे।यस्या:प्रत्यूषसम
मधस्नात्र।
ये स्नानंकुर्यात्तुं इतः। वर्द्धमानतिथौनंदायदासर्वात्रियामिकी। द्वितीयाहङ्गिामिन्या
उत्तरातत्र चोच्यते।प्रतिपत्कर्म्मेराकायांयःकुर्यादूतिमंगलम्।त्रीणितच्यप्रवर्द्धन्तेप्रजाग। १०४

५४

वोमहीपतिः।पुत्राभित्रकलत्रानीतिनिगमवाक्याच्चास्मिन्नर्थेनविवादः। याकुहूश्च
तिपन्मिश्रातत्रगाःपूजयेन्नृप।पूजनात्रीणिवर्द्धन्तेप्रजागावोमहीपतिः।कार्त्तिकस्यासितेपक्षे
बुलेरात्रिर्यदाल्पवेत्।यत्नेनपूजयेज्ञावस्यषधर्म्मःसनातनः।नंदायादर्शनेरक्षावलिदानंद
शासुच।सेद्धायांगोकुलक्रीडा सदेशोवैविनश्यति। गोःपूजनंभूतिशुमंगलंचपूर्वेण
युक्तंमुनयोदिशंति।दिनद्वयेवेध विधौविधेयंराज्येकुलेवद्धिकरंप्रशूनाम्।प्रतिपद्यभिक
रणंद्वितीयायांगवार्च्चनम्।हन्यन्ते द्विजानीयाद्विन्ननाशंकुलक्षयम्।
तथादेवकर्म्मवापूर्वाह्णेकर्तव्यत्वम्।पूर्वाह्णोवैदेवानामिति
श्रुतेः।तत्तश्चपूर्वाह्णव्यापिन्यांश्रावण्युपाकर्म्मकर्त्तव्यम्। पर्वोप्योद

यिके कुर्युः श्रावणीं तैत्तिरीयकाः। बह्वृचाः श्रवणे कुर्युर्ग्रहसंक्रान्तिवर्जितम्। तच्चैतत्तैत्तिरीय
काः इत्यफलस्मरणं तेनाध्येपि यजुःशाखिनो लक्ष्यन्ते। तेषामपि पर्वण्युपाकर्म्मविधानात्।३।
स्वस्वान्तराधिकरणोच्चायसिद्धश्चायमर्थः। संप्राप्ते श्रावणस्यान्ते पौर्णमास्यां मिनोदये।
कुर्वन्ति ब्राह्मणाः स्नानं वेदानुद्दिश्य शक्तितः। यत्र दैर्घ्यौ समुत्पन्नौ वसु
रौ मधुकैटभौ विदारयन्ती कुर्वन्ति पञ्चयोनेरसौ जहार श्रुतीः। हत्वा तावसुरौ देवः पातालतलवा १०५
सिनौ। आहृत्य ताः श्रुतीः ब्रह्मणे दत्तौ लोकपूरुः। स्वयम्भूः संप्राप्तवान् श्रुतीर्ब्रह्मा पर्वणि यो दयिके
पुनः। अतो भूतयुते तस्मिन्नोपाकरणमिष्यते। असुरैश्च वर्ज्ये येकालं वेदाहरणशंकया। तस्मात्तै
त्तिरीयका इति कष्टमात्रं विधीयते। तस्मात्तैत्तिरीयकपदं ह विफलयजुरुपलक्षकम्।

ऋग्वेदुपाकृतिः पौर्णमास्यां पूर्वाह्णे एव तु। ब्राह्मणानुद्राजयेत्तत्र पितृनुद्दिश्य देवताः।४।
इति सामाद्येनाभिधानात्। धनिष्ठाप्रतिपद्युक्तं वा दृश्याङ्क समन्वितः। श्राव
णं कर्म्म कुर्वीत ऋग्यजुःसामपाठकाः। धनिष्ठायुक्तं श्रवणनक्षत्रं प्रतिपद्युक्तं पर्व वित्राख्य
कं हस्तनक्षत्रम्। वेधश्च षड्घटिकात्मको ज्ञेयः। वेधः षड्घटिका ज्ञेय इति स्मरणात्।
उपाकर्म्म प्रकुर्वन्ति क्रमात्सामयजुर्विदः। ग्रहसंक्रान्तियुक्तेषु हस्तश्रवणपर्वसु। अथ
वेद्दोषसंयुक्ता पर्वणि स्यादुपक्रिया। सुरश्लोकामयचसाराहे तस्मिन् द्विजातयः।
पुष्येतु छंदसां कुर्याद्बहिरुत्सर्जनं द्विजः। माघशुक्लस्य वा प्राप्ते पूर्वाह्णे प्रथमेहनि। श्राव
णी दुर्गानवमीत्यादिवचनस्थ तु कर्म्मविशेषात् उपादानात्। हिरण्यगर्भेष्वपवित्रारोपणे वि

Indira Gandhi National
Centre for the Arts

षया॥ उपाकर्म्माङ्गभूतमस्तु दर्यिकं वा तच्छ्रवणे नक्षत्रमुत्तराषाढविद्धं न या खंडतिथेर्या त्र।
॥ श्रावणेन तु यत् कर्म्म उत्तराषाढसंयुते। संवत्सरकृतोऽध्यायस्तत्क्षणादेव नश्यति।
धनिष्ठासंयुतं कार्यं श्रावणं कर्म्म यद्भवेत्। तत्कर्म्म फलवृद्धिः स्यादुपाकर्म्मेति संज्ञितं। यत्तु षां
पूर्णिमायाश्च मासनक्षत्रसंयुता। श्रावणं च धनिष्ठा च मासे स्थे श्रावणे भवेत्। व्रतस्नानोपवा
सादौ घटिकैकापि या भवेत्। उदये सा तिथिर्ज्ञेया श्राद्धे दिवसगामिनी॥ दिनार्द्धोत्परतश्चेत्स्या २०६
त्तु श्रावणी कालयोगतः। रात्रौ सहावसाने च तु रक्षाबंधः प्रशस्यते प्रहरत्रयमध्याच्चा द्विती
ये दिवसे यदा। प्रतिपद्वर्द्धमाना च तदा सा पारिकीर्त्तिता॥ मासमंज्ञा यदा चन्द्रे
संपूर्णमंडलः। पौर्णमासी तु सा ज्ञेया न दास्या परिकीर्त्तिता॥ नक्षत्रं सर्वदा याज्ञं दि

क

नाक्षत्रं यदि वर्त्तते। पूर्वविद्धे परपदे पूर्वो निशीथे शशिनामहाय दिश्या च श्रावणं पर्वयद संक्रान्तिदुष्टि
तः स्यादुपाकरणं शुक्लपंचम्यां श्रावणस्य तु। शुक्लपंचमी तिवाजसनेयानि श्रायेणा॥
संक्रान्तिग्रहणं वापि यदि पर्वणि जायते। तन्मासे हस्तयुक्तायां पंचम्यां वा तदिष्यते। ह
स्तयुक्ताया मन्यस्यां तिथौ पंचम्यां वेति विकल्पः। अत्र च शुक्रगुर्वस्तादि दोषो नास्तीति विशिष्टो परिष्टा
द्रूपा मः। पौषमास
छन्दो हिष्या मष्टकायामथापि वा। जलान्ते छंदसां कुर्यादुत्सर्गं विधिवद्बहिः। मनुः। अतः परं तु छंद
सि शुक्लेषु नियतः पठेत्। वेदांगानि रहस्यं च कृष्णपक्षेषु संपठेत्। पुष्येतु छंदसां कुर्याद्बहि
रुत्सर्जनं द्विजः। माघशुक्लस्य वा प्राप्ते पूर्वाह्णे प्रथमेहनि। श्रावणे यदोपाकर्म्म तदा पुष्ये त्स

धा २

म

ज्ञो। यदा त्वाङ्पदे तदामाघशुक्लप्रतिपदि। … ९ अर्द्धपंचमान्मासानधीत्येर्द्दमुत्सृजेति। पंचा
ईषध्याचेति। … मासपाना। तत्रामावास्याद्वेधा संक्षेपतः
शुद्धा भूतविद्धा च। विद्धा तु चतुर्विधा। एका प्रतिपद्यपराह्णव्यापिनी। द्वितीया भूत एवापराह्णव्या
पिनी न प्रतिपदि। तृतीया भूते च प्रतिपदि चापराह्णव्यापिनी। चतुर्थी भूते प्रतिपदि चापराह्णव्या
पिनी। या तिथिरपराह्णं सर्वं व्याप्नोति सापराह्णिकी तद्रहिता नापराह्णिकीति। १७
अमावास्या द्विधा। १ शुद्धा भूतविद्धा च सा पुनः चतुर्धा प्रतिपद्येवानुतएवापराह्णिकी तथा वि
धोत्यत्रस्थाश्च यत्रानथा विधा। तत्र सिनीवाली सदा पित्र्ये कुहूर्दैवे च कर्म्मणि। भूतविद्धाममा
वास्यां मोहादज्ञानतोपि वा। श्राद्धकर्म्मणि ये कुर्युस्तेषामायुः प्रहीयते। इत्यादिवाक्यानि क वि

भूतविद्धायाममावास्यायां श्राद्धविधिविधायकानि कवचित्प्रतिषेधकानीति संशये विषयव्य
वस्थोच्यते। उदयादारभ्य द्वितीयोदयपर्यन्तं स्थिता शुद्धा सा निर्विवादा तत्र तिथेः षष्टितवायत्वा
वाद्विवादे तत्र श्राद्धं कर्त्तव्यं। चतुर्विधासु विद्धासु या प्रथमा प्रतिपद्येवापराह्णकालव्यापिनी सा
प्रतिपद्विद्धेव ग्राह्या। अपराह्णः पितॄणां तु यापराह्णानुयायिनी। सा ग्राह्या पितृकृ
त्येषु तत्र पूर्वाप्सानुयायिनीति। भूतविद्धाममावास्यां मोहादज्ञानतोपि वा। श्राद्धकर्म्म
णि ये कुर्युस्तेषामायुः प्रहीयते। मोहो विपरीतज्ञानम्। अज्ञानं ज्ञानाभावः। मध्याह्ना
त्परतो यत्र चतुर्दश्यनुवर्त्तते सिनीवाली तिसाज्ञेया पितृकार्येषु निःफला। मध्याह्नश्चात्र चेधा
विभक्तस्य दिवसस्य मध्यभागपरः। न तृतीयभागपरः। तेन मध्याह्नात्परतो वर्त्तते सायंकालेवर्त्त

Indira Gandhi National
Centre for the Arts

तइत्यर्थः। एतेष्ववाक्येषु मध्याह्नमस्पृश्यवेधोस्मिन्मतः। द्वितीयास्तु प्रतिपत्कर्षिणिगा कृत एवापरा
ह्णिकी कृतविद्धा श्राद्धकार्या। पूर्वाह्णे चेदमावास्या नापराह्णे भवेद्यदि। कृतविद्धैव सा
यासापि ष्टकार्येषु सर्वदा। नापराह्णे प्रतिपदी तिथ्योषायामावास्या प्रतिपदि पूर्वाह्णएवस्वेन्ना
पराह्णइत्यर्थः। प्रतिपद्यप्यमावास्या पूर्वाह्णव्यापिनी यदि। कृतविद्धैव सा कार्या पित्र्ये क
र्म्मणि सर्वदा। या या मावास्या पूर्वाह्णव्यापिनी नापराह्णं व्याप्नोतीत्यर्थः। तृतीयास्तु उत्तरत्रापराह्णिकी २०८
चतुर्दश्यां प्रतिपत्त्वापराह्णिकी भवति सा युक्ता विज्ञातव्या। तत्रेयं श्ववृत्तासामेन पूर्वा अन
हिमामे स्त्रीशूद्राणां तु द्वितीया। सिनीवाली द्विजैर्ग्राह्या साग्निकैः पितृ
कर्मणि स्त्रीभिः शूद्रैः कुहूर्ग्राह्या तथा चानग्निकैर्द्विजैः। यास्त्वत्र चापराह्णसंबद्धा सा चि विधि

कुतपाः स्मृताः। कुतपाद्या मुहूर्त्तास्त्रीन्यदा चरति भास्करः। सकालः कुतप
स्तत्रपितॄणां दत्तमक्षयं। अपराह्णप्रवेशात्ताकेवविरिंस्यव्यापित्वात्तावादेवं विधकुतपव्यापित्व
ममावास्यायां नास्तीति चेत्। पूर्वाह्णे चेदमावास्या नापराह्णे भवेद्यदि। प्रतिपद्यपि कर्त्तव्यं
श्राद्धं श्राद्धविदो विदुरिति। जाबालिवचनेन अमावास्याया अस्तत्वे प्रतिपद्यपि श्राद्धकालत्वे
नाभिधाना कुतपत्वपक्षस्य प्रतिपद्भागेपि समाप्तेश्च न विरोधः। न तु दिनद्वयेप्यपराह्णव्यापि
स्या अमावास्या अस्तत्वे पूर्वा ग्राह्येति स्मृत्यन्तरवचनात् प्रतीयते। घटिकैक
प्यमावास्या [illegible] व्यापराह्णिकी कृतविद्धापि सा ग्राह्या श्राद्धे वा पित्र्ये च कर्म्मणि। प्रतिप
द्यप्यमावास्या [illegible] पराह्णगता [illegible] कृतविद्धैव सा ग्राह्या पित्र्ये कर्म्मणि सर्वदा। अत्रापि अह

Indira Gandhi National Centre for the Arts

इतेप्यपराह्णव्यापित्वं प्रतीयते। नेदं वचनद्वयं दिनद्वयापराह्णव्यापित्वविषयं भवति किं
तु एकतरत्रैवापराह्णव्यापित्वविषयं। अपिशब्दस्यायमर्थः। यथा हुतेपराह्णव्यापित्वलाभे अपरा
ह्णव्यापिन्यां प्रतिपन्मिश्रिता यामेव श्राद्धं। तथा प्रतिपद्यप्यपराह्णकालव्यापित्वलाभे अ
पराह्णव्यापिन्यां भूतविद्धायां श्राद्धमिति। न तु भूतविद्धापीति वचनमप्युभयत्रापराह्णव्यापित्व
विषयं न भवति। भूतं प्रतिपदमध्य कुतपकालिकीति हेमाद्रिः। अकृतविषयतावग
म्यते। ननु कोऽयं दृष्टकालस्य मध्याह्नस्य कथं पार्वणश्राद्धाङ्गत्वमिति चेत्। न। भूतविद्धाप्यमा ११७
वास्या प्रतिपन्मिश्रिता च या। तयोरपि दृष्टकुतपयुक्तास्या कुतपकालिकीति विशेषवाक्येन।
कोऽदृष्टाङ्गस्तद्व्यापिकुतपकालस्य पार्वणश्राद्धाङ्गत्वेनोपदेशनात्। ननु पराह्णव्यापिनी

यास्येत्युक्तं तत्रापराह्णकालस्य पार्वणश्राद्धे कथमादरः। श्रुत्यानीदनात्।
पूर्वाह्णो वै देवानां मध्यंदिनो मनुष्याणामपराह्णः पितॄणामिति। पूर्वाह्णे दैविकं श्राद्ध
मपराह्णे तु पैतृकं। एकोद्दिष्टं तु मध्याह्ने प्रातर्वृद्धिनिमित्तकमिति। पार्वणाङ्गत्वेन गजच्छायायाश्च
कथनाच्चापराह्णादरः। वनस्पतिगते सोमे या च्छाया पूर्वतोमुखी। गजच्छाया हि
सा तत्र पितॄणां दत्तमक्षयमिति। स्मृत्यन्तरेऽपि। हिरण्यायात्मनश्छायां दृश्येत्यादापराह्णिकी। ग
जच्छाया हि सा प्रोक्ता पितॄणां तृप्तिकारिणी। अपराह्णकालश्च पंचधा विभक्तस्य दिनस्य चतुर्थो
भागः। मुहूर्तत्रितयं प्रातस्तावानेव तु संगवः। मध्याह्नस्त्रिमुहूर्तः स्यादपराह्णस्तत
हशः। सायाह्नस्त्रिमुहूर्तेनश्च सर्वकर्मसु गर्हितः। उदयात्तु दिवे यावत्त्रिमुहूर्ते गतोर

दा१

विः प्रातःकालः स विज्ञेयो दिनभागः स पंचमः। तस्मात्प्रातस्तनात्कालात्त्रिमुहूर्त्तेषु संगवः॥ त्रिमु
हूर्त्तेक मध्याह्नस्तस्मात्संगवकालतः। तस्मान्मध्यं दिनं कालादपराह्णस्तथाविधः। अपराह्णात्त्रिमुहू
र्त्तेः कालः सायाह्न उच्यते॥ केचित्तु पंचदशधा दिनं विभज्यापराह्णमाहुः॥ रौद्रश्चैव
श्वमैत्रश्च तथा सारभटः स्मृतः। सावित्रश्च जयं तद्वद्गांधर्वः कुतपस्तथा। रौहिणश्च विरिंचश्च वि ११९
जयो नैर्ऋतस्तथा। महेंद्रो वरुणश्चैव पटः पंचदश स्मृताः॥ केचित्त्रेधा दिवसस्य विभागमाहुः॥
पूर्वाह्णो मध्याह्नोऽपराह्णः पूर्वाह्णो देवानां मध्यं दिनं मनुष्याणाम् अपराह्णः पि
तॄणाम्॥ केचिद्द्विधा विभागमाहुः॥ आवर्त्तनात्तु पूर्वाह्णो ह्यपराह्णस्ततः परः॥
यथैवापरः पक्षः पूर्वपक्षाद्विशिष्यते। कृतं विद्धे च सर्वेषां श्राद्धं भवति यत्नतः॥ इति

ब

तथा श्राद्धस्य पूर्वाह्णादपराह्णो विशिष्यते। आवर्त्तनं मध्याह्नः। न तु कन्यां मकरमीनेषु तुला
यां मिथुने तथा। कृतविद्धे च सर्वेषां श्राद्धं भवति यत्नतः इति हारीतवचनात्कृतविद्धे च ग्राह्यम्। त
त्कथमिदमुक्तम्। रविगत्यादि विषयमेतत्। तुलायां मकरे मीने कन्या
यां मिथुने तथा। कृतविद्धा कृते ग्राह्या शेषे भुक्तिषु ते त्यनेन विषयव्यवस्थापनान्न विरोधः
एवं मन्वन्तरादीनां युगादीनामपि निर्णयो
ऽनुसंधेयः। मन्वादितिथीराह वल्लभाचार्यः। चैत्रे ज्येष्ठे कार्त्तिके च फाल्गुने पूर्णिमा प्रथमा। फा
ल्गुन्याश्वयुजी शुक्ला नवमी कार्त्तिकी सिता। द्वादशी च तृतीया च चैत्रे भाद्रपदे सिता। एकादशी सि
ता पौषी पूर्णिमा दशमी सिता। आषाढी च जयन्ती च माघी शुक्ला च सप्तमी। चतुर्दशी तामुनि सि[illegible]

Indira Gandhi National Centre for the Arts

कामन्वन्तरादयः। एताश्चतुर्दशतिथयो मन्वन्तरादयः कथिताः। काः स्ता इत्याह। चैत्रे कार्त्तिका
ज्येष्ठफाल्गुणे मासि पूर्णिमा। पौर्णमासी। चशब्दः समुच्चयार्थः। तथा फाल्गुनी फाल्गुनमास
संबंधिन्यथमा। अमावास्या। अपिशब्दः समुच्चयार्थः। आश्वयुजी। अश्वयुजमाससंबंधिनी फा
ल्गुनमाससंबंधिन्यप्यमा। अपिशब्दः समुच्चये। आश्वयुजी। अश्वयुजमाससंबंधिनी शुक्लनव
मी। कार्त्तिकी कार्त्तिकमाससंबंधिनी सिता द्वादशी। चकारः समुच्चये। चैत्रे भाद्रपदे च मासि सि
तातृतीया। चकारश्चैत्रभाद्रपदसमुच्चयार्थः। पौषी पौषमाससंबंधिनी सितैकादशी। आषा ११२
ढी आषाढमाससंबंधिनी पूर्णिमा सिता दशमी च। चकारः समुच्चये। जयन्ती श्रावणमासि
कृष्णाष्टमी जयन्त्युच्यते। माघे मासि शुक्ला सप्तमी। चकारः समुच्चये।

अश्वयुक्शुक्लनवमी कार्त्तिकी द्वादशी सिता तृतीया चैत्रमासस्य तथा भाद्रपदस्य वा फाल्गु
नस्याप्यमावास्या पुष्यस्यैकादशी सिता। आषाढस्यापि दशमी माघमासस्य सप्तमी। श्रावणस्या
ष्टमी कृष्णा आषाढस्यापि पूर्णिमा। कार्त्तिकफाल्गुनी ज्येष्ठी चैत्री पंचदशी तिथिः। मन्वन्तरादय
श्चैता दत्तस्याक्षयकृतदः। अत्र द्वादशी सितेत्यत्र सिता शब्दस्तृतीययाप्यन्वेति। एकादशी सितेत्य
त्र सिता शब्दो दशम्याप्यन्वेति। मतान्तरं तु। आषाढी द्वादशी माघी शुक्ला वै कार्त्तिकाष्टमी। पौ
ष्यमा पूर्णमुक्ता श्रोक्ता मन्वन्तरादयः। आषाढी आषाढमाससंबंधिनी। शुक्ला द्वादशी शुक्ला
कार्त्तिकाष्टमी। शुक्लाशब्दो द्वादश्याप्यन्वेति। पौष्यमा पौष्यमाससंबंधिनी। अमा अमावास्या
र्वमुक्ता भाद्रपदस्य सिततृतीया फाल्गुनमावास्या। आषाढदशमी श्रवणाष्टमी च विहायान्याश्च

Indira Gandhi National
Centre for the Arts

ययश्च मन्वन्तरादय। चकारः समुच्चये। अश्वयुक्शुक्लनवमी कार्त्तिकी
द्वादशी सिता। तृतीया चैत्रमासस्य ज्येष्ठे पंचदशी सिता। सप्तमी माघमासस्य पुष्यस्यामात
था परा। वृश्चिके चाष्टमी कृष्णा मकरे द्वादशी सिता। गोविंदद्वादशी कुंभे मेषे पंचदशी स्मृता
कार्त्तिकी फाल्गुन्याषाढी पूर्णिमा द्वादशी सिता। मन्वन्तरादयश्चैता मुनिभिः परिकीर्त्तिता। अ
श्वयुक्नवमी सिता पंचदशी पौर्णमासी ह वृश्चिके कार्त्तिकी मकरे पुष्ये कुंभे माघे मेषे चैत्रे आ ११३
षाढी पूर्णिमा द्वादशी च। शुक्ला तृतीया वैशाखी
नवमी कार्त्तिकी सिता। माघी चामा तथा प्रौष्ठपदी कृष्णत्रयोदशी। एताश्चतस्रस्तिथयो युगा
द्याः परिकीर्त्तिताः। वैशाखी वैशाखमाससंबंधिनी शुक्ला तृतीया। कार्त्तिकी कार्त्तिकमाससं

बंधिनी अमा। तथा प्रौष्ठपदी भाद्रपदमाससंबंधिनी कृष्णत्रयोदशी। एताश्चतस्रस्तिथयो यु
गाद्याः परिकीर्त्तिताः। वैशाखमासस्य तृतीया नवम्यसौ कार्त्तिकशुक्ल
पक्षे नभस्यमासस्य च कृष्णपक्षे त्रयोदशी पंचदशी च माघे। वैशाखस्य तृतीयायां
नवमी कार्त्तिकस्य च। अमावास्या च माघस्य नभस्ये च त्रयोदशी। युगादयः स्मृता ह्येताः पितॄणां
तृप्तिहेतवः। मन्वादिषु युगादिषु च कर्त्तव्यम्। मन्वाद्यासु युगाद्यासु प्रदत्तः सलिलांज
लिः। सहस्रवार्षिकीं तृप्तिं पितॄणामावहेत्परां। हिमाद्राश्विकीटसिंहकृतं श्राद्धं यथाविधि। स्ना
नं दानं जपो होमः पुण्यानंत्याय कल्पते। पानीयमप्यत्र तिलैर्विमिश्रं दद्या
त्पितृभ्यः प्रयतो मनुष्यः। श्राद्धं कृतं तेन समाः सहस्रं रहस्यमेतत्पितरो वदंति।

Indira Gandhi National Centre for the Arts

तेषांश्राद्धं विधानेन मन्वादिषु युगादिषु। हायनानि द्विसाहस्रं पितॄणां तृप्तिदं भवेत्। आसु स्नानं
जपो होमः पुण्यानं त्याथकल्पते पुण्यानंतायभवतीत्यर्थः।       यामन्वाद्याश्च यु
गाद्याश्च तिथयस्तासु मानवः। स्नात्वा दत्वा च हुत्वा च जप्त्वानंतफलं लभेत्।
नभस्यस्याप्यपरः पक्षो यत्र कन्यां व्रजे
द्रविः। स महालयसंज्ञः स्याद् गजच्छायाह्वयस्तथेति।। तथा नभस्यस्यापरः पक्षः शुक्लप्रतिपदा स
हा महालय इति प्रोक्तो गजच्छायाह्वयस्तथा। नभस्यस्य भाद्रपदस्य अपरः पक्षः कृष्णपक्षः शुक्ल २२५
प्रतिपदा अस्य युक्तः शुक्लप्रतिपदा सह महालय इति प्रोक्तः। तथा गजच्छायाह्वयः प्रोक्त इत्यर्थः।
कन्यां गते सवितरि यान्यहानि च षोडश। क्रतुभिस्तानि तुल्यानि समाश्व

रस्थितेः।       अहः षोडशकं यत्तु शुक्लप्रतिपदा सह। चंद्रक्षयाविशेषेण सा पितॄणां
त्तिकास्मृता। अत्र हेमाद्रिराह। वर्गद्वयं समुद्दिश्य श्राद्धमाद्यन्तदैविकम्। कुर्यात्पार्वणमार्गेण
नोत्रेद्दोषो महान्भवेत्। पितृवर्गं मातामहवर्गं च समुद्दिश्य श्राद्धं कुर्यात्। पितृपितामहप्रपिता
महाः पितृवर्गः मातामहप्रमातामहवृद्धप्रमातामहवर्गः।       पितरो यत्र पूज्य
न्ते तत्र मातामहा अपि। अविशेषेण कर्तव्यं विशेषान्नरकं व्रजेत्। आद्यन्तदैविकं आदावन्ते च पि
विकं वैश्वदेविकं यस्य तत्तथा।       देवाद्यं चैव कुर्वीत देवान्तं नैव कुत्र चित्। दैवाद्यं
तर्हि कुर्वीत श्राद्धं लक्षणहेतुना। तत्र पार्वणविधानेन पद्युरूपोद्देशेन कुर्यात्।
उत्तराहस्त्वविज्ञाय कन्यायां त्वागते ति स्थिते। पार्वणस्याप्रतीता कुर्याद् एकोद्दिष्टमत्सराः। अहेताप

परिपाद्याविधानेनेत्यर्थः। आषाढीमवधिंकृत्वापंचमंपक्षमाश्रिताः।कांक्षं
तिपितरःक्लिष्टाअन्नमप्यन्वहंजलम्।तस्मात्तत्रैवदातव्यंदत्तमप्यत्रनिःफलम्।
नैयोगिकीतिथिर्येषांपक्षोवैपंचमःस्मृतः।तस्मिन्नकृतंहविर्दत्तंपितृणामक्षयंभवेत्।
पुत्रानायुस्तथारोग्यमैश्वर्यमतुलंतथा।प्राप्नोतिपंचमेदत्वाश्राद्धंकामांस्तथापरान्।पंच
मेआषाढीमवधिंकृत्वापंचमेपक्षेऽकरणेदोषश्रुतिश्च। सूर्येकन्यागतेश्रा
द्धंयोनकुर्याद्गृहाश्रमी।धनंपुत्राःकुतस्तस्यपितृनिश्वासपीडयेति। वृश्चिकेस
मतिक्रान्तेपितरोदैवतैःसह।निश्वस्यप्रतिगच्छन्तिशापंदत्वासुदारुणम्।रवेःकन्यागतेनाप्य १२५
कृष्णपक्षस्यपूज्यत्वमुक्तम्। आदौमध्येवसानेवायत्रकन्यांव्रजेद्रविः।

सपक्षःसकलःपूज्यःश्राद्धषोडशकंप्रति।नत्वाषाढीमवधिंकृत्वायःपक्षःपंचमोभवेत्।तत्र
श्राद्धंप्रकुर्वीतकन्यास्थोवाऽथवाभवेत्।इतिमनुवचनाद्रवेःकन्यागतत्वमनादृत्यैवकृष्णपक्षस्य
पूज्यतोक्ता।तत्कथमिदमितिचेत्। अवश्यंश्राद्धंकुर्यादित्येतत्परमिदंवचनंनतुक
न्यागतत्वप्रतिषेधपरम्। हस्तर्क्षस्थेदिनकरेप्रेतराजानुशासनात्ता
वत्प्रेतपुरंशून्यंयावद्वृश्चिकदर्शनम्।हस्तनक्षत्रस्थताचोत्तरफाल्गुनीद्वितीयपादेकन्यागत
त्वेवभवतीतिनविरोधः। आगतेपितृवोकन्यांश्राद्धंकुर्वीतसर्वथा।आषा
ढ्याःपंचमःपक्षःप्रशस्तःपितृकर्मसु।सर्वथाप्यपरपक्षः।किंचात्रविशेषमाहगौतमः।अथाप
रपक्षेश्राद्धंपितृभ्योदद्यात्।पंचम्यादिदर्शान्तमष्टम्यादिदशम्यादिसर्वस्मिन्वेति।



Indira Gandhi National
Centre for the Arts

नलभ्यत्कृष्णपक्षे श्राद्धं कुर्याद्दिने दिने। चित्रागहीनं पक्षं वा चित्रागं वर्ज्जमे
व वा। चित्रागहीनपक्षे पंचम्यादित्रिनागपक्षे दशम्यादि। अर्द्धपक्षे अष्टम्यादीनि सर्वे स्मृ
तिवचाः पक्षाः संभवंतीति। तत्र शाकपेक्षया पक्ष चित्रागोऽद्धयः। प्रथमपक्षाशक्तौ द्वि
तीयः पक्षः। तस्याशक्तौ अष्टम्यादिपक्षः। तस्याशक्तौ दशम्यादिपक्ष इति। अत्र विशेषमाहानंनं
दासु भृगौ वारे रोहिण्यां चतुर्जन्मसु। रेवत्यां च मघायां च कुर्याद्दापरपक्षिकं। नंदासु प्रति ११६
पत्षष्ठ्येकादशीषु भृगोः शुक्रस्य वारे रोहिण्यां चतुर्जन्मसु। जन्मदिने जन्मनक्षत्रे जन्मतारा
यां च न कुर्यात्। नंदायां भार्गवदिने चतुर्दश्यां त्रिजन्मनि। एषु श्राद्धं न कुर्वी
त गृही पुत्रधनक्षयात्। तथा मघायां पिंडदानेन ज्येष्ठपुत्रो विनश्यति। अत्र श्राद्धनिषेध

परे पिंडदाननिषेधवचने श्राद्धपूर्वकत्वात्पिंडदानस्य। क्रतैर्नैमित्तिकं का
र्थं श्राद्धं यस्तु मघासु दिने दद्यात् ज्येष्ठपुत्रस्य नाशः स्यादिति निश्चितं। प्राजापत्येऽप्
पौष्णे पित्र्यर्क्षे भार्गवे तथा। यस्तु श्राद्धं प्रकुर्वीत तस्य पुत्रो विनश्यति। प्राजापत्यं रोहिणी। पौ
ष्णं रेवती। पित्र्यर्क्षं मघा। अत्र च नंदादिनिषेधः प्रथमपक्षं विनानुसरणीयः
मुख्याद्यपक्षं नंदादि विवर्ज्य माङ्गर्मनी विण इति। नलभ्यत्वापरे
पक्षे श्राद्धं कुर्याद्दिने दिने। नैव दानं दिवर्ज्यं स्यान्नैव कृष्णेचतुर्दशी। मत्र रपि। कृष्णपक्षे दश
म्यादिवर्ज्यं पिवाचतुर्दशी। श्राद्धे प्रशस्तास्तिथयो यथैतानतथेतरा इति। कौस अपर
पक्षे श्राद्धं कुर्वीतोर्द्ध्वं वा चतुर्थ्याः यदहः संपद्यते न ते चतुर्दशी। शाकेनापिनापरपक्षमति

Indira Gandhi National Centre for the Arts

काम्ये दिति। प्रतिपत्प्रभृति षिकां वर्ज्ज्यित्वा चतुर्द्दशी मित्ययाज्ञवल्क्यविशेषवचनबलादेवा
द्यपक्षव्यतिरिक्तेष्वेवायं प्रतिषेधः प्रवर्त्तते। चतुर्द्दशीप्रतिषेधश्च पक्षचतुष्टयेपि। अत्र वि
शेषः। अस्मिन्महालयगणे सा हि महालयगणे स्यते। त्रयोदशी गजच्छायायां गयामध्याष्टमी तिथि
आसु श्राद्धं गयाश्राद्धं सममाहुर्महर्षयः। तरणी पितृपक्षे तु महती परिकीर्त्तिता
अस्यां श्राद्धं कृतं येन स गयाश्राद्धकृद्भवेत्। पितृपक्षे महालये। यदेंदुः पितृदैवत्ये हं
सश्चैव करे स्थितः। याति थिर्हि स्वेत्सा तु गजच्छाया प्रकीर्त्तिता। आषाढ्याः पं
चमे पक्षे गयामध्याष्टमी स्मृता। त्रयोदशी गजच्छाया गयायास्तुल्ये तु पितृत्पतः। पितृदैवत्यं। मघा
करो हस्तः। हंसः सूर्यः। याद्या त्रयोदशी। पित्र्ये श्राद्धकर्म्मणि। अत्र विशेषः। असंभवे तु लभ्य। ११०

धा२

वृश्चिकं यावत्तत् श्राद्धं कार्यं। येयं दीपान्विता राजन्ख्याता पंचदशी तु वै।
तस्यां दद्यान्न चेद्दत्तं पितृणां वै महालये। पितृणां महालयेन दत्तं चेत्तर्हि तस्यां दद्यादित्यर्थः।
दीपान्विता पंचदशी तु तुलासंक्रांतियुक्ताश्विनकृष्णपक्षोपलक्षकं। अश्वयुग्दर्शपर्यंतं श्रा
द्धं कार्यमित्यर्थः। तच्चाप्यसंभवे यावद्वृश्चिकं कार्यं। कन्यां गते सवित
रि पितरो यान्ति वै सुतान्। तावत्तिष्ठंति पुरं शून्यं यावद्वृश्चिकदर्शनं।
अथ श्राद्धकाला [illegible]। अमावास्याष्टकावृद्धिः कृष्णपक्षोऽयनद्वयं। द्रव्यं
ब्राह्मणसंपत्तिर्विषुवत्सूर्यसंक्रमः। व्यतीपातो गजच्छाया ग्रहणं चेंदुसूर्ययोः। श्राद्धं प्रति रु
चिश्चैव श्राद्धकालाः प्रकीर्त्तिताः। एतांस्तु श्राद्धकालान्वै नित्यानाह प्रजापतिः। अमावास्यायां

Indira Gandhi National Centre for the Arts

कृष्णपक्षस्य पंचदशी तिथिः। सा पूर्वेद्युरेव। अष्टका आश्वलायनोक्ताः हेमंतशिशिरयोश्चतु
र्णामपरपक्षाणामष्टमीष्वष्टका इति। मार्गशीर्षपौषमाघफाल्गुणे। कृ
४ ष्णपक्षेषु पूर्वेद्युरष्टकां तयाष्टमी इति तिस्रोष्टकास्तासु श्राद्धं कुर्वीत पार्वणं। आद्याऽपू
पैः सदा कार्या मांसैरन्या भवेन्नृप। शाकैः कार्या तृतीया स्यादेष द्रव्यगतो विधिः
ऐंद्र्यां च प्रथमायां तु शाकैः संतर्पयेत्पितॄन्। प्राजापत्यं द्वितीयायां मांसैः श्राद्धैश्च तर्पयेत्
श्राद्धैः प्रशस्तैः वैश्वदेव्यां तृतीयायामपूपैश्च यथाक्रमं। वर्षासु मध्ये शाकैस्तु चतुर्थ्यामेव सर्व ११८
र्वदा। अत्र शाकादीनां विकल्पः स्वशाखानुसाराद्विज्ञेयः। मार्गशीर्षपौषमाघ
फाल्गुणेऽष्टपदे च कृष्णपक्षेषु पूर्वेद्युरष्टम्यष्टकां चेति। तिस्रोष्टकास्तासु श्राद्धं कुर्वीत

पूर्वेद्युः सप्तमी। अन्वष्टक्यं नवमी। हेमन्तशिशिरयोश्चतुर्णामपरपक्षेष्वष्ट
काः कुर्यादिति। वृद्धिः पुत्रजन्मादिः। कृष्णपक्षः प्रसिद्धः। तस्य कालत्वं प्रतिपदाद्यपरह्वारेण। अ
यनद्वयं दक्षिणोत्तरायणं द्रव्यं श्राद्धीयपक्वामिषादि तत्संपत्तिर्यस्मिन्दिने तथा पंक्तिपावन।
श्रोत्रब्राह्मणस्य संपत्तिः। लालः यत्र सद्यः श्राद्धकालः। विषुवं मेषतुलयोः सूर्यसंक्रमः। राशेराश्यंत
रगमनम्। संक्रान्तिग्रहणेनैवायनविषुवतोरपि प्राप्तौ पुनरुपादानं फलाधिक्यद्योतनार्थं
अमावास्यास्तिस्रोष्टकास्तिस्रोन्वष्टकास्तिस्रः पूर्वेद्युः पौषपक्षे हेमन्तशिशिरयोरपरप
क्षेषु चतुर्दशी इति। व्यतीपातो योगविशेषः पारिभाषिको वा।
श्रवणाश्विधनिष्ठार्द्रानागदैवतमस्तके यद्यमा रविवारे व्यतीपातः स तु व्यतीपातः।

Indira Gandhi National
Centre for the Arts

गदैवतमश्लेषात्तच्छमस्तकेचथमपादेयदित्रंइत्याद्यित्यर्थः।यद्वा मस्तकंमृगशिरः
घत्याह्निकेप्येवमेवतिथिर्ग्राह्यापराह्णिकी।उभयत्र तथात्वे
पिसमत्वेन विनिर्णयः।समत्वेपूर्वविद्धैवग्राह्या तथात्वेपिसायदि त्रिमुहूर्तास्ति वेत्सायंसर्वेष्वेवं
विनिर्णयः।अस्यार्थः।प्रत्याह्निकेप्रतिसंवत्सरंक्रियमाणेसांवत्सरिकैकोद्दिष्टश्राद्धेप्येवमे
व।अमावास्यायामिवापराह्णिकीअपराह्णकालव्यापिनीतिथिःस्वीकार्या। पूर्वा
ह्णोवैदेवानांमध्यंदिनंमनुष्याणामपराह्णःपितॄणामितिश्रुतेः। अपराह्णःपितॄणांत ११९
याऽपराह्णव्यापिनी।सायाह्नव्यापिदैवत्येषुनपूर्वाह्णव्यापिनी।उभयत्रतथात्वे अपरा
ह्णव्यापित्वेसमत्वेन विनिर्णयः।यातिथिर्महतीग्राह्यासाग्राह्या। ह्यपराह्ण

व्यापिनीचेदाह्निकश्चयदातिथिः।महतीतत्रविद्वोसःप्रशंसंतिमहर्षयः।ह्यपराह्णो व्याप्नोति
इतिह्यपराह्णव्यापिनी।अपराह्णद्वयेसमत्वेनह्यतिथेस्कल्यत्वेपूर्वविद्धैवग्राह्या।
दर्शेचपूर्णमासेचपितुःसांवत्सरंदिनं।पूर्वविद्धामकुर्वाणोनरकंप्रतिपद्यते।उभयत्र
तथात्वेतिथेःक्षयगामित्वेनापराह्णद्व्याप्त्यापित्वेसाम्येतिथिर्ग्राह्यायापूर्वेद्युःसायंत्रिमुहू
र्तास्तिचेत्। साह्यह्व्यापिनीचेत्स्यान्मृताहश्चयदातिथिः।पूर्वविद्धैवकर्तव्या
त्रिमुहूर्तास्तिचेद्यदि।पूर्वेद्युःसायंसमयइतिवाक्यशेषः। अस्तसमयवेलायांक
लामात्रापियातिथिःसैवप्रत्याह्निकेज्ञेयानापरापुत्रहानिदा।इदमपिपूर्वेद्युस्त्रिमुहूर्तां ति
थिःस्वीकार्या।इत्येवंपरंकलामात्रास्वीकार्यानितरात्रिमुहूर्तेत्यर्थः।नतुसमत्वेपूर्वविद्धैवेत्य

Indira Gandhi National
Centre for the Arts

नैनैवकृष्ठेविद्वाङ्गीकारादतयात्रेपिसेतिपुनरुक्तिर्व्यर्थो। प्रत्याब्दिकेप्येवमेवेति प्रत्याब्दि
केप्यमावास्याधर्मोतिदेशात्। अपराह्णद्वयव्यापित्वे अमावास्यायामिव पर विद्धाङ्गीकाराज्ञा
सक्तो अयं विधिरिति नवैयर्थ्यम्। पूर्वेद्युस्त्रिमुहूर्त्तोत्तरावेपर विद्धैवग्राह्या कार्यो।
त्रिमुहूर्त्तासवेद्धासापरैवकृतयेहिसेति। अत्रकृतपपदसंकृतपरौहिणविरिश्वाख्यमुहूर्त्तत्रयप २२०
रत्वानत्तु ति। दृष्टिरस्य विषयेपर विद्धाग्रहणोक्तपक्षापित्वेयुक्तिः। तर्हि पूर्व विद्धाग्रहणंनष्टा
त्राष्टततिथेरपराह्णेकृतपेवासावात्। सातिथिस्तदहोरात्रंयस्यामस्तमियाद्रविः। इति
वाक्यानुसारेणास्तमयतिथेः पूर्वे विद्धाग्रहणमतोनविरोधः। नत्वेवंपरविद्धाग्रहणेपि। यांतिथिं
समनुप्राप्यनदयंयातिभास्करः। सातिथिः सा कलाज्ञेयेतिवचनानुसारोस्तु। तिथि

हासृद्धिविषयत्वादस्यवचनस्येतिनकिंचिदनुपपन्नम्॥ ॥अत्र विशेषमाह। आशौचेंतगतेतस्मि
न्ननंतरदिनेभवेत्। अयमर्थः। सांवत्सरिके आब्देसंजाते यद्याशौचंस्यात्। तदातस्मिन्नाशौचेगते
अतीतेसतितच्छ्राद्धंभवेत्। अनुष्ठेयंस्यादित्यर्थः। आब्दिकेचैवसंप्राप्ते आशौचं
जायतेयदि। आशौचेतुव्यतीक्रान्तेतस्यश्राद्धंप्रतीयतइति। अशौचानन्तरं करणासंभवदर्शविषु
याम्। देयेप्रत्याब्दिकश्राद्धेचांतरामृतसूतके। अशौचानन्तरं कुर्यात्तन्मासेदु
स्तयेपिवेति। विशेषान्तरमाह। मासाज्ञाने दिनज्ञानेकार्यमाषाढमाघयोः कृत्वाहं तद्दिनज्ञाने
मासाज्ञानेतुतत्कुहूः। कृष्णावैकादशीयास्यावज्ञानेष्वुतयोरपि। प्रवासमासदिवसोयात्राव
केकयाप्रयोः। अज्ञानेनत्वरोच्यायक्षस्त्वज्ञानंयदाभवेत्। श्रवणाहेतदाकुर्यात्तन्मासेतुद्वयेपि

वा। यदा मरणमासो न ज्ञायते मरणदिनं ज्ञायते तदा आषाढे माघे वा मासि सांवत्सरिकं श्रा
द्धं कार्यम्। यदा मासो न विज्ञातो विज्ञातं दिनमेव तु तदाषाढके मासि मा
र्घे वा तद्दिनं स्वेद्गुः। यदा मासो विज्ञातः मरणदिवसश्च न ज्ञातस्तदा तन्माससंबंधिनी कृष्ण
अमावास्या कृष्णैकादशी वा ग्राह्या। न ज्ञायेत मृताहश्चेत्प्रोषिते संस्थिते स
ति। मासश्चेत्प्रतिविज्ञातस्तद्दर्शः स्यादथाह्निकं। श्राद्धविघ्ने समुत्पन्नेऽक्षयाहे विदिते २२१
तथा। एकादश्यां प्रकुर्वीत कृष्णपक्षे विशेषतः। उभयोरपि मरणमासदिवसयोरज्ञाने प्रवा
समासदिवसौ ग्राह्यौ। यस्मिन्मासि यस्मिन्दिवसे वा देशान्तरं गतः तस्मिन्मासे तस्मिन्दिवसे
कुर्यात्। दिनमासौ न विज्ञातौ मरणस्य यदा पुनः। प्रस्थानमासदिवसौ ग्रा

ह्यौ पूर्वोक्तया दिशा। ज्ञातयोरेकैकस्याज्ञाने अनन्तरोक्तन्यायः स्वीकार्यः। अथ प्रवासे यदा प्रवा
समासो न ज्ञायते दिवसश्च ज्ञातस्तदा आषाढे माघे वा मृताहं कार्यं। यदा प्रवासमासो वि
ज्ञातो दिवसश्च न ज्ञातस्तदा प्रवासमाससंबंधिनी दर्शे तिथिः कृष्णैकादश्यां वा कुर्यात्।
पूर्वोक्तया दिशेति। यदा सर्वाज्ञानं स्यात्तदा। मरणमासो मरणदिवसः प्रवासमा
सः प्रवासदिवसश्च न ज्ञातस्तदा श्रवणाहे मरणश्रवणदिवसे तत्कुर्यात्। तच्चासंभवे श्रवणमा
ससंबंधिनि दर्शे तत्कुर्यात्। अपरिज्ञाते ऽमावास्यायां श्रवणदिने वेति। या
तिश्राद्धे विशेषमाह। यतेर्महालये दर्शे वा मृतश्च मृतेऽहनि पार्वणं वितरेत्पांतदेकोद्दिष्टं
दवास्वेद्या वाशब्दः समुच्चये। यतेः संन्यासिनस्त्रिदण्डिन एकदण्डिनश्च मृताहे पार्वणं स्वे

न। दाऽग्रहणमात्रेणैवप्रेतोलब्धतृप्तिः।अतश्चतेनकर्तव्यंपार्वणंतस्यसर्व
दा।महालयेऽपरपक्षेवामृतस्यमृताहेपार्वणंभवेत्। अमायांवाकन्यायांयस्यप्रेत
पक्षेऽथवायदि।पार्वणंतस्यकर्तव्यंनैकोद्दिष्टंकदाचन।इतरेषामसन्यासिनांमहालयव्य
तिरिक्तपक्षमृतानांदर्शव्यतिरिक्तदिनमृतानांतत्पार्वणमेकोद्दिष्टंवाविकल्पेनभवेत्।
सपिण्डीकरणादूर्ध्वंप्रतिसंवत्सरंनरैः।मातापित्रोःपृथक्कार्यमेकोद्दिष्टंमृताहनि
शातातपः।सपिण्डीकरणादूर्ध्वंकुर्यात्पार्वणवत्सदा।प्रतिसंवत्सरंविद्वान्छागलेयोदितोवि १२२
धिः।एवंविधपरस्परविरुद्धवचनानांदर्शनाद्विकल्पः।
तत्रेत्थंव्यवस्था।एकादशेह्निमासूनआद्येषष्ठे

तथात्रिमेप्रतिमासमृतेऽब्दंस्युस्त्रिपक्षेचषोडश।अस्यार्थः।एकादशेऽह्निआद्येमासिऊनेष
ष्ठेमासिऊनेसंवत्सरान्त्रिमेमासिऊनद्वादशमेमासिअब्दमितिकालावनोरिति द्वितीया।संव
त्सरपूर्त्तिपर्यन्तंप्रतिमासंमासेमासेमृतेऽहनिमरणदिनेत्रिपक्षेचमरणदिनात्तृतीयपक्षेचषो
डशमासिकाख्यानिश्राद्धानिस्युः।एतेषुषोडशसुकालेषुषोडशश्राद्धानिकार्याणीत्यर्थः।
मृतेऽहनितुकर्तव्यंप्रतिमासंतुवत्सरम्।प्रतिसंवत्सरंचैवमाद्यमेकादशेऽहनि।
ऊनषाण्मासिकेषष्ठेमास्यर्द्धऊनमासिकं।त्रैपक्षिकंत्रिपक्षेस्यादूनाब्दंद्वादशेतथा।एतान्येवतु
षोडशमासिकाख्यानिश्राद्धानिस्युरिति। द्वादशप्रतिमास्यानिआद्यंषाण्मा
सिकेतथात्रैपक्षिकाद्विकंचेतिश्राद्धान्येतानिषोडश।आद्यमासिकशब्दाऊनमासिकोना

ज॰८०।वि॰ ह्निकपरः॥ एकादशाहाह्निकेनाद्येन सह द्वादशप्रतिमासश्राद्धानि द्वादशाहे त्रि
पक्षे च षण्मासे मासिकाह्निके श्राद्धानि षोडशैतानि संस्मृतानि मनीषिभिः॥ द्वादशाहे विहित
मूनमासिकं षण्मासे ऊनषण्मासे विहितमूनषाण्मासिकं मासिकं प्रतिमासं विहितमेकाद
शाह्निकमाद्यं च आह्निकपदमूनाह्निकपरं नन्वूनमासिकस्य कथं द्वादशाह्निकत्वम् मा
१२३ सिकिंचिद्दिने विहितत्वात्॥ द्वादशोमासिकिंचिद्दिनेवा विहितत्वात्॥ म
रणाद्द्वादशोऽह्नि श्राद्धं मासूनेऽस्नमासिकं। विश्वादर्शोऽपि। मासेपूर्णे दशसु मृतदिने श्राद्धमेका १२३
दशाहेऽस्नाद्येयन्नदर्थं तदर्पितदपरं द्वादशाहे त्रिपक्षे इति त्रिप
क्षात्पूर्वतः सापिण्ड्यसंस्कारवासरे। ऊर्ध्वं मृतदिने न मेः सर्वाण्येव मृताहतः। सापिण्ड्यविहिताग्नेः

त्रिपक्षात्पूर्वतः पूर्वं च कर्तव्यं मासिकं संस्कारवासरे। दाहदिने स्वेच्छया। अथ सकाकारयेद्वाहाद
हिताग्नेः द्विजन्मनः इति। मासिकानि मृतदिने स्वेयुः। अनग्नेरनाहिताग्नेः। सर्वाण्येव मासिकानि
मृताहतो लवेयुः मृताहत[illegible]सत्रणश्य पथ्ये सार्वविलक्षिक स्मृतिः। ऊर्ध्वं त्रिपक्षा
द्यतश्राद्धं मृताहन्येव तद्भवेत्। अथ सकाकारयेद्वाहादाहिताग्नेर्द्विजन्मनः। ऊनमासिकेषु च विशे
षस्तेनोक्तः। एकोद्दिष्टं तु संघातेय दि विघ्नः प्रजायते। मासेऽन्यस्मिंस्तिथौ तस्यां कुर्याद्दत्तरितं च तत्।
अत्रैकोद्दिष्टपदमुलयविधं मासिकमुपलक्षयति। तेनायमर्थः। अन्तरितं मासिकं तन्मासस्वं वि
चमासिकं उत्तरमासि मृताहे कुर्यादिति। अत्रैव विशेषमाह। त्रिपक्षे रेवनंदास्तु दर्शे सागे स्व
मरे। वृद्धिश्राद्धं न कुर्वीत जनानि त्रीणि वह्निते। अत्र त्रिपुष्करशब्दो द्विपुष्करमप्युपलक्षयति।

द्वितीयासप्तमीद्वादशीनांपुनर्वसूत्तरफाल्गुनीविशाखोत्तराषाढपूर्वभाद्रपदनक्षत्रा
णांसातुलैमशनैश्चराणांमेलनेत्रिपुष्करम्।नंदाःप्रतिपत्षष्ठेकादश्यः।भार्गववारः।शुक्र
वारः।वह्निसंज्ञत्तिकात्रीणिपूनानिजननमासिकमनषाण्मासिकमनाब्दिकानित्रिपुष्करन
दादश्यशुक्रवारचतुर्दशीकृत्तिकासुत्रीणिपूनानिनकुर्यादिति।नंदायांभार्गवदिनेचतुर्द्दश्यां
त्रिपुष्करे।अन्नश्राद्धंनकुर्वीतगृहीपुत्रधनक्षयात्। द्विपुष्करेचनंदासुसितिवात्यां।
द्विगोर्द्दिनेचतुर्दश्यांवनेनानाजिक्त्तिकासुत्रिपुष्करे। १२४
आद्याद्यश्राद्धंमरणाद्विषमेषुदिनेषुचानवश्राद्धानिचातिष्ठेदेको।
द्दिष्टंविधानतः।मरणदिनादारभ्यद्वादशाहपर्यंतंविषमेषुदिनेषुप्रथमतृतीयपंचमस

प्तमनवमैकादशमदिनेषुप्राणनवश्राद्धानिएकोद्दिष्टश्राद्धस्थविधानतोमंत्रतंत्रप्रक्रियातो
नुतिष्ठेत्। सप्तमेह्नितृतीयेह्निपंचमेनवमेतथा।एकादशेपंचमेस्युर्नवश्राद्धानिषट्
कथा।केचित्पंचैवनवश्राद्धानिनवमंयदिदैवात्प्रतितंरवेत्तदाएकादशोह्नितकुर्यादित्याहुः।
मरणाद्विषमेषुदिनेषुएकैकंनवश्राद्धंकुर्यादानवमाद्यत्रनवमंविह्नि
द्यतेएकादशेह्नितंकुर्यादिति। वर्णविपर्ययेव्यवस्थोक्ता।नवसप्तविंशांराज्ञां।
नवश्राद्धान्यनुक्रमात्।आद्यत्रयोर्वर्णयोक्तषडित्याहुर्महर्षयः।विशांनवराज्ञांसप्तेत्यनुक्र
मः।शिवस्वामिनाउक्तिपक्षेवव्यवस्थोत्तरस्मुक्तानवश्राद्धानिपंचाङ्गराश्वलायनशाखिनः।आ
पस्तंबाःषडित्याहुर्विशेषात्तैत्तिरीयिणः।इति।क्षत्रियाणांसप्तनवश्राद्धानिवैश्यानांनवशूद्र

Indira Gandhi National
Centre for the Arts

णांविप्राणांचषट्।तत्राप्याश्वलायनआश्विनोपंचआपस्तंबानांषट्इतितैत्तिरीयाणांपंचषड्इ
तिविकल्पः यदाहकालादर्शकारः। एकादशेद्वादशेह्नि
त्रिपक्षेवात्रिमासिवा। षष्ठेवैकादशेवाब्देसंपूर्णेवाशुभागमे। सपिण्डीकरणस्येत्थमष्टौका
लाःप्रकीर्तिताः॥ अथसपिण्डीकरणंततःसंवत्सरेपूर्णेद्वादशाहेवेति।
अथसपिंडीकरणंसंवत्सरेपूर्णेत्रिपक्षेवायदिवावृद्धिरापद्येतेति॥
अथसंवत्सरेपूर्णेसपिण्डीकरणंत्रिपक्षेवातृतीयेमासिषष्ठेवैकादशेवाद्वादशाहेवेति।अ १२५
त्रैवंकालव्यवस्था।साग्नौकर्तर्युत्तरावाद्यौप्रेतेसाग्नावनंतरः।अनग्नेस्तुद्वितीयाद्याःसप्तकाला
मुनीरिताः। कर्त्तरिप्रेतेसाग्नावाहिताग्नौसति।आद्यौतुद्वौकालौस्याताम्।एकादशाहोद्वाद

हिताग्नेःप्रेतस्यपूर्णेब्देवत्सरतर्षेलाद्वादशाहेनिषष्ठेवात्रिपक्षेवात्रिमासिवा।एकादशेपिवामा
सिमंगलस्याप्युपस्थिते।नत्वसाग्निनानग्निनावाद्वादशाहेत्रिपक्षेवामासिसापिण्ड्येप्रमादात्क्व
तेकालातीतेवातत्रलोपःस्यादित्यत्राह।प्रमादादिकृतेतस्मिन्त्रिपक्षेद्वादशेह्निवा।उत्तरो
त्तरकालेषुयथासंभवमाचरेत्।प्रमादात्साग्निनानग्नेःप्रेतस्यानग्निनासाग्नेःप्रेतस्यतस्मिन्सपि
ण्डीकरणेकृतेउत्तरोत्तरकालेषुत्रिपक्षादिषुयथासंभवंयत्रसंभवतितत्रकुर्यात्।
द्वादशाहादिकालेषुप्रमादादननुष्ठितंसपिण्डीकरणंकार्यंकालेषूत्तरेष्विति।अत्र
विशेषमाह।पितृमृतस्यसापिण्ड्यंमृतयोरुभयोर्द्वयोः।एकस्मिन्वाद्वयोर्वापिजीवतस्तुसुतश्चरे
न्मृतस्यपितुःसपिण्ड्यंनद्वयोर्द्वयोःपितामहप्रपितामहयोर्मृतयोःसुतश्चाचरेत्।

Indira Gandhi National Centre for the Arts

संवत्सरान्ते प्रेताय तत्पित्रे तत्पितामहाय तत्प्रपितामहाय च ब्राह्मणान्भोजयेदेव पूर्वे सोऽज्ञये
त्॥ ननु पितामहे प्रपितामहे वा जीवति द्वयोर्वा जीवतोः कथं श्राद्धं तत्राह। एकस्मिन्वा द्वयोर्वापि
सापिण्ड्यं जीवतोः मृतस्य एकस्मिन्वेति। पितामहे प्रपितामहे वा जीवति द्वयोर्वा जीवतोः सतोः
सपिण्डीकरणं कुर्यादित्यर्थः। मृते पितरि यस्याथ विद्यते च प्रपितामहः। ते
न देयास्त्रयः पिण्डाः प्रपितामहपूर्वकाः। तेभ्यश्च पैतृकः पिण्डो नियोक्तव्यश्च पूर्ववत्॥ य १२७
स्य पिता प्रेतः स्यात्पितामहे जीवति सपिण्डपिण्डं निधाय पितामहात्परास्तान् दद्यात्। सुमन्तुः त्र
याणामपि पिण्डानामेकेनापि सपिण्डने। पितृत्वमश्नुते प्रेत इति धर्मो व्यवस्थितः। ननु व्युत्क्रमा
त्प्रमीतानां नैव कुर्यात्सपिण्डतामिति वचनाद्विपरीतक्रममरणे सापिण्ड्यमेव नास्तीति प्रम

यत इत्यत्र हि योनिषेधः स मातापितृसद्व्यतिरिक्तविषयः। व्युत्क्रमेण प्र
मीतानामसपिण्डीकृतिरिष्यते। यदि माता यदि पिता तत्रायं नैष विधिः स्मृतः। यदि माता न व्युत्क्रम
मृता यदि पिता व्युत्क्रममृतः तत्रापि वा व्युत्क्रममृत इत्यध्याहार्ययोऽप्यग्रे। मृते पित
रि यस्याथ विद्यते च पितामहः। प्रपितामहपूर्वं तु कार्यमत्राप्ययं विधिः। मातृसपिण्डीकरणे वि
शेषमाह। पत्न्या कुर्यात्स्वजायायाः पतिर्मात्रादिभिः सह। सापिण्ड्यमन्वयान्वे जनकेन सहात्मजः।
पितामह्यादिभिर्द्वे भ्रविवाहोढस्त्रियः सुतः। पितृपक्षे मातृपक्षे वा सुराद्या इतास्तु तः। पतिरपु
त्रायाः मृतायाः पत्न्याः सापिण्ड्यं मात्रादिभिर्मातृपितामहीप्रपितामहीभिः सह कुर्यात्।
अपुत्रायां मृतायां तु पतिः कुर्यात्सपिण्डनं। सह श्वश्र्वादिभिस्तस्याः सापिण्डीकरणे

Indira Gandhi National
Centre for the Arts

जे०द०वि वेश। एवं सर्वत्र प्राप्तापवादमाह। अन्वयानऽग्नि। अन्वयानमग्निप्रवेशः। तत्रात्मजः पुत्रः जनके
न पित्रा सह मातुः सापिण्ड्यं कुर्यात्। पत्याश्चैकेन कर्तव्यं सपिण्डीकरणं स्त्रियाः।
सा मृतापि हि तेनैक्यं गता मंत्राहुतिव्रतैरिति। मृता यानुगता नाथं सा तेन सह पि
१२८ ण्डिता। स्वर्गवासोपि यावदाहूतसंप्लवं। अत्र च विशेषमाह। ब्राह्मदैवार्षप्राजापत्ये
र्विवाहे रूढायां स्त्रियाः सुतः पितामह्यादिभिः सह मातुः सापिण्ड्यं कुर्यात्। मातुः
सपिण्डीकरणं कथं कार्यं लवेस्मृतेः। पितामह्यादिभिः सार्द्धं सपिण्डीकरणं स्मृतं। विशेषान्तरमा १२८
ह। पितृपक्षै रिति। आसुरादिभिरासुरगांधर्वराक्षसपैशाचैराहूतायाः ऊढायाः स्त्रियाः सु
तः पितृपक्षैः पित्रादिभिः पितामह्यादिभिः पितामह्यादिभिर्वा मातृपक्षैर्वा मातामह्यादि

भिर्वा मातृपक्षैर्वा मातामह्यादिभिर्वा विकल्पेन सापिण्ड्यं कुर्यात्। जीवत्पितापि
तामह्या मातुः कुर्यात्सपिण्डतां। प्रमीतपितृकः पित्रा पितामह्या पिता सुतः। सुमंतुः। पितापितामहे
योज्यः पूर्णे संवत्सरे सुतैः। माता मातामहे तद्वदित्याह भगवाञ्छिवः। तन्मात्र
तत्पितामह्यां तद्भ्राता वा सपिंडनं। आसुरादिविवाहेषु विन्नानां योषितां स्मृतं। अत्र पत्याश्चै
केनेति वचने पत्येति पदं पित्रादिवर्गोपलक्षकं। अत्र विशेषमाह। विवाहपुत्रभेदेन तज्ज
[illegible] व्यवस्थितं ब्राह्मादिविवाहभेदेन अरसपुत्रिकापुत्रादिभेदेन च तज्जो व्यवस्थितं ब्रा
[illegible] विवाहत्रयोढायाः स्त्रियाः स्वगोत्रेणोद्दिष्टं किं कार्यं। आसुरादिवत्रयोढा
[illegible] त्रेणौरसपुत्रः पुत्रिकापुत्रो मातामहगोत्रेणेति वाक्यार्थः। मात

Indira Gandhi National Centre for the Arts

णपितुःपिण्डोदकक्रियाः।कुर्वीतपुत्रिकापुत्रएवमातामहप्रजापतिः।
दत्तेषुविवाहेषुयाऊढाकन्यकास्तासांभर्तृगोत्रेणकर्तव्यास्तस्याःपिण्डोदकक्रियाः।आसु
विवाहेषुपितृगोत्रेणधर्मविदितिः।पितृगोत्रेणमातुःपितृगोत्रेण।अत्रपुनर्विशेषमाह।अ
पुत्रस्यापिकुर्वीतधर्मपत्नीसपिण्डनं।अपुत्रस्यापिधर्मपत्नीधर्मेणसहाधिकारिणीसापिण्ड
तांकुर्यात्।ननुस्वापुत्रस्यपरेतस्यनतुकुर्यात्सपिण्डतां।अथोच्यतेस्कंदपिण्डमेकोद्दिष्टंनपार्व
णं।अपुत्रायेमृताःकेचित्पुरुषोवास्त्रियोपिवा।तेषांसपिंडतानास्तिएकोद्दिष्टंनपार्वणमित्या १२९
दिवचनेनपुत्ररहितस्यसपिण्डनस्यतिरस्कारःप्रतीयते। सर्वासामेवपत्न्यःस्वभर्तृहीना
ममंत्रकंसपिण्डीकरणंकुर्युरतःपार्वणमेवच।अपुत्रेप्रस्थितेकर्तानस्वेच्छाहृत्कर्मणितत्र

पत्न्यपिकुर्वीतसापिण्ड्यंपार्वणंतथेति।लोगाक्षिस्मृतिवाक्येनसपिण्डीकरणाद्यौर्ध्वदे
ह्यावश्यकर्तव्यताप्रतीयतेअतःप्रजाश्चोत्पादयितव्याइतिविध्यर्थवादस्तयानतुवचनद्वयंव
र्णनीयमिति।अत्रयतिविषयेविशेषः। एकोद्दिष्टंजलंपिण्डमाशौचंप्रेतस
त्क्रियांनकुर्यात्पार्वणादन्यद्ब्रह्मीभूतायभिक्षवे।नतत्संन्यासिनांकुर्यात्पार्वणंद्वादशेऽहनि।
नत्सपिण्डीकरणंसंन्यासिनांत्रिदंडिनामेकदंडिनांचयतीनांनकुर्यादित्यर्थः।
सपिण्डीकरणंतेषांनकर्तव्यंसुतादिभिः।त्रिदंडग्रहणादेवप्रेतत्वंनैवजायते।त्रिदंडग्रहण
मित्युपलक्षणमेकदंडग्रहणादित्यपिद्रष्टव्यं। चतुर्थमाश्रमंग
त्वाब्रह्मविद्यापरायणः।एकदंडीत्रिदंडीवासर्वसंगविवर्जितः।तदाहोशनाः।एकोद्दिष्टंन
८

Indira Gandhi National
Centre for the Arts

कुर्व्वीतयतीनांचैवमव्वेदा।अहच्येकादशेतेषांपार्व्वणंतु विधीयते।अत्र विशेषः।कामाद्वाण्ड
लगोविउसर्प्पवैद्युतदंष्ट्रिभिः। निहतानांविषोद्बंधशस्त्रैरात्मत्यजामपि। विधिंविनैवान्न्यो
नोदकाग्निपतनैरपि। ऊर्द्ध्वंसंवत्सरात्सर्व्वेमोर्द्ध्वदेहिकमाचरेत्। पाषंडमाश्रि
तास्तेनास्तर्ष्य कामगादिकः। ब्रह्मण्याप्यात्मघातिश्चोनाशौचोदकभाजनाः। आदिश
ब्दात्स्वात्स्वर्त्टब्राह्मणादिघातिन्यतपसंयासाः मेच्छयामरणं विषाच्छुंगिदंष्ट्रि १३१
सरीसृपेः। अंत्यात्मजविषोद्बंधैरात्मनश्चैवताडनैश्च। संचूर्णसर्व्वगात्राणांविषादाकर्षतोपि
वाजालाग्निगर्त्तपातैश्च निराहारादिभिस्तथा। येषामेवंस्तवयंतेचैकथिताःपापकर्म्मिण
पाषंडमाश्रिताश्चैवमहापातकिनस्तथा। स्त्रियश्चव्यभिचारिण्यश्चारूढपतितास्तथ

मि

थां...संस्कारोनश्राद्धंनसपिण्डनमिति। अंत्यायामांत्यजाः विधिंविनैवात्तवचनाद्विधिनाअन
शनादिनाप्रयागादिमरणेनकालविलंबः। वृद्धशौचक्रियालुप्ताः प्रत्याख्या
तात्विषक्रियः। आत्मानंघातयेद्यस्तु भृग्वग्न्यनशनांबुभिः। तस्यत्रिरात्रमाशौचंद्वितीयेचास्थिसं
चयः। तृतीयेतूदकंदत्वाचतुर्थेश्राद्धमाचरेत्। तथाचाग्रेशुद्धिप्रकरणेनिरूपयिष्यामः।
अत्रकामादितिवचनादकामतश्चाण्डादिद्वारामरणेनकालातिपातइति।
अथकश्चित्प्रमादेन म्रियेताग्न्युदकादिभिः। तस्याशौचंविधातव्यंकर्त्तव्याचोदकक्रियाऽ
त्रविशेषः। अनाकर्णितवान्येषु शोषितस्य पित्रःसुतः। ऊर्द्ध्वंपंचदशाहश्चादौर्द्ध्वदेहिकमाच
रेत्। अनाकर्णितवार्त्तस्य अकृतक्रियस्य शोषितस्य देशान्तरगतस्यापि...वौर्द्ध्वदेहि

Indira Gandhi National
Centre for the Arts

कस्मृतः। पंचदशवर्षोऽर्द्धमाचरेत्। पंचदशसु वर्षेष्वतीतेषु कार्यो इत्यर्थः॥
पितरि प्रोषिते यस्य न वार्त्ता नैव चागतिः। ऊर्द्ध्वं पंचदशाद्वर्षात्कृत्वा तत्प्रतिरूपकं। कुर्या
त्तस्य च संस्कारं यथोक्तविधिना ततः। तदा निमित्तं सर्वाणि प्रेतकार्याणि संचरेत्। पितृव्यतिरिक्त
विशेषमाह। यद्येषां द्वादशाद्वा सर्वेषु स्वेवत तिथिः। अथ एषां पितृव्यतिरिक्तानां पितृव्यभ्रा
तृपत्न्यादीनां द्वादशाब्दाद् ऊर्द्ध्वं पितृमेधिकमाचरेत्। यस्य न श्रूयते वार्त्ता यावद्द्वा १३१
दश वत्सरान्। कुशपुत्तकदाहेन तस्य स्यादवधारणं। कस्मिन्दिने प्रेतकं कार्यमित्यत्राह। न तिथि
पूर्वमुक्तैव पितृमेधस्यात्र स्थाने तिथिर्मासाज्ञाने दिनाज्ञाने इत्यादिना पूर्वमुक्तैव ... पितस्य
प्रत्याब्दिकश्राद्धेया तिथिः सैव ग्राह्येत्यर्थः। पंचदशाब्दं द्वादशाब्दं वा वार्त्तानाकर्णने मरणानि

स्मृ॰

श्च। यद्यपि अदेहिके कृते जीवन् स यदि समागच्छेत्तदा किं विधेयमित्यत्राह। यद्यागच्छेत्तु मा जीवन्प्रे
तमेधिकसंस्कृतः। घृतमध्ये स्नापयित्वा तमुत्थाप्य कुलेश्वरेण संस्कृतं जातकर्माद्यैरुपनीतं वि
धानतः। द्वादशाहं त्रिरात्रं वा विहितोपोषणं व्रतं। मिरावागत्य पूर्वां वा तत्पत्नीं वेपत्नीं श्रियं।
ऊढवंतं च संकुर्याद्वरुणायुष्मते न च। प्रोषितः प्रेतमेधेन कर्म्मणा संस्कृतः पुनः। यद्यागच्छेत्त
दा तमागतं घृतकुंभे स्नापयित्वा पुरेरूणज्योति। शास्त्रे सामवेनेन निर्दिष्टे लग्ने तमुत्थाप्य जा
तकर्मनामकरणान्नप्राशनचूडाकरणादिसंस्कारैः संस्कृत्य विधानेनोपनीय यस्मिन्कस्मि
श्चित् स्त्रियो द्वादशाहं तोपोषणव्रतं तद्दशाकौ त्रिरात्रोपोषितं आगत्य मिरे रागत्य पूर्वोर्णां तांस्त्रि
यमृत्विंतं तत्पत्नीवेद्यां स्त्रियमूढवंतं आयुष्मते नवरुणा संस्कुर्यात्। अग्न आयुष्मते पुरोडा



Indira Gandhi National Centre for the Arts

श्वमष्टाकपालं निर्वपेदिति शास्त्रविहितेनायुष्मदग्निदेवताकेन चरुणा संस्कुर्यात्। आहिता
ग्नेः पुरोडाशश्चानाहिताग्नेश्चरुः। यएवाहिताग्नेः पुरोडाशः सएवाना
हिताग्नेश्चरुरिति। ज्ञीक्ष्य हि समागच्छेन्न घृतकुंभे नियोजयेत्। उद्धृत्य स्नापयि
त्वाथ जातकर्मादि कारयेत्। द्वादशाहं व्रतं चरेत्। त्रिरात्रमथवाष्टौ भस्मावावहेत्तुतांस्तायां
मध्यां वा तत्र लावतः। अग्निमाधाय विधिवद्द्वात्य सोमेन वा यजेत्। अथेन्द्राग्नेन पशुना गिरिं गत्वा १३२
यत्र तत्र। इष्टिमायुष्मतीं कुर्यात् ईप्सितांश्च क्रतूंस्तत इति। विशेषान्तरमाह। उक्तेषु कालेषु धूक्त
तं सापिण्ड्यं यदि मित्रसरोहिणीराड्डहस्तेषु न कुर्यादिति निर्णयः। सपिंडी
[illegible]ण्येन प्रमस्तान्वक्तं तत्र वेत्। अनुराधार्द्रहस्तेषु रोहिण्यां वा समाचरेत्। गालवः सपिण्डीक

रणश्राद्धमुक्तकालेष्वेव चरेत्। रोड्डहस्तेषु रोहिण्यां मैत्रे वा समाचरेत्। अनुराधार्द्रहस्तेषु स
तदुक्तं।
पिण्डीकरणं स्वेति
एकोद्दिष्टं वमध्याह्ने श्राचरेत्।
एकोद्दिष्टं तु मध्याह्ने नवश्राद्धादिकं चरेत्। नवश्राद्धमेकोद्दिष्टं तु मध्याह्ने प्रातर्वृद्धिनिमित्तकमिति
पूर्वाह्णे मातृकं श्राद्धमपराह्णे तु पैतृकं। एकोद्दिष्टं तु मध्याह्ने प्रातर्वृद्धिनिमित्तकं।
गालवः। पूर्वाह्णे चैव मध्याह्ने चापराह्णे च दैविकं। एकोद्दिष्टं पार्वणं च वृद्धिश्राद्धं तथाग्निकं।
श्रारस्य कुतपे श्राद्धं कुर्याद्रौहिणं बुधः। विधिज्ञो विधिमास्थाय रौहिणं तु न लंघये
त्। रौहिणं लंघयेद्यस्तु ज्ञानाद्ज्ञानतो पि वा। आसुरं तद्भवेच्छ्राद्धं पितॄणां नोपतिष्ठते।
न केवलमेकोद्दिष्टश्राद्धं पार्वणश्राद्धमपि कुतपे आरभ्य रौहिणे समापयेदिति।

तत्र कुतपे आरंभं तु पार्वणस्य मध्याह्ने। कुतपे आरंभ विधानात्। अह्नो
मुहूर्त्ता विख्याता दश पंच च सर्वदा। तत्राष्टमो मुहूर्त्तो यः स कालः कुतपः स्मृतः। दिवसस्याष्टमे
भागे मंदीभवति भास्करः। तस्मादनंत फलदस्तत्रारंभो विशिष्यते। अत्र मुहूर्त्ता कुतपाद्य मुहू
र्त्त चतुष्टयं। मुहूर्त्त पंचकं ह्येतत्स्वधा भवनमिष्यते। न तु रौहिणेय समाप्ति विधानमप्यस्ति।
शुक्लपक्षे तु पूर्वाह्णे श्राद्धं कुर्याद्विचक्षणः। कृष्णपक्षे पराह्णे तु रौहिणं तु न लंघयेत्।
सत्यां वासरस्य तृतीयांशेनाति संध्या समीपतः। इति वचन विरोधादेतद्वचनमेकोद्दिष्ट विषयत्व १३३
मभ्युपगच्छामः। न च मावास्याया मपराह्णाद्वोध्यापि चेद्दर्शश्राद्धं कुतपे आरभ्य रौहिणे समापये
दित्युक्तं। पूर्वाह्णे वै पितृपदमिति विशेषवचन बलेन तद्विषय एव विषये तदित्युच्यते। अतः

सर्वे पार्वण विषयत्वं रौहिण समापनस्य। न च क्वचित्वक्तुं तेनैकोद्दिष्ट विषयत्वं दर्शश्राद्ध विशेष
विषयत्वं चेति निश्चयः। एवं च नागो द्वादशनाडीति दिक्पंचदशस्तिथिः। भूतो द्वादशनाडीति
ईषयतु तरां तिथिमित्यादि पित्रागो द्वादशनाडी तिर्यक्पंचदशनागोः। भूतो द्वादशनागेरित्य
र्थः। अशः। न तु बोधायनेन भूतो द्वादशनाडीति ईषयतु तरां तिथिमित्युक्तम्। कथं द्वादशना
डी वेधोक्तिः। सत्यं। उत विषये द्वादशनाडी वेधोक्तिः। श्राद्ध विषये द्वादशनाडी वेधोक्तिरिति वि
षय व्यवस्था द्रष्टव्या। द्वादशाष्टादशांशोर्ये तृष्टोत्तरवेधनम्। आद्यं व्रते
तु विज्ञेयं द्वितीयं श्राद्धकर्म्मणि।
नैमित्तिकं तु यच्छ्राद्धं निमित्तानंतरं भवेत्। नांदीमुखाद्यं यज्ञातरायिकं च परा

ह्निकं वपराह्णतः। अयमर्थः। यच्छ्राद्धं नैमित्तिकं तन्निमित्तानन्तरं स्यादेव। अपराह्णे एकोद्दिष्टोक्तम
ध्याह्ने चाघ्ववेकः। नांदीमुखाख्यं श्राद्धं प्रातः पूर्वाह्णे स्यादेव। ननु च प्रातः पदं संगव पूर्वकालवा
चि। तत्कथं तस्य पूर्वाह्णपरत्वमिति चेत्। सत्यं। स्मृतिषु पूर्वाह्णपरत्वप्रतीतेः। ललाट
संमिते लाते प्रथमः प्रहरः स्मृतः। स एवाध्यर्द्धसंयुक्तः प्रातरित्यभिधीयते। अध्यर्द्धसंयुक्त इति।
अधिकेन प्रहरार्द्धेन संयुक्तः। आमश्राद्धं तु मध्याह्ने एकोद्दिष्टं तु मध्यमे। पार्वणं चा १३४
पराह्णे तु प्रातर्वृद्धिनिमित्तकं। एवं सर्वस्य नांदीमुखस्य प्रातःकालप्रसक्तावपवादमाह। आग्नि
कं च पराह्णतः। अस्यार्थस्तत्र। आग्निकमाधानोत्पत्तिनिमित्तं। अग्न्याधानमित्तमिति यावत्। तदप
राह्णे स्यात्। आमश्राद्धं तु पूर्वाह्णे सिद्धान्नेन तु मध्यतः। पार्वणं चापराह्णे तु वृद्धि

श्राद्धं तथाग्निकमिति। सिद्धान्नेन तु मध्यत इत्येकोद्दिष्टश्राद्धविषयम्। अत्र नैमित्तिके नैमि
त्तानन्तरमिति न युक्तं। नैमित्तिकस्यापि वृद्धिश्राद्धस्य पूर्वाह्णापराह्णयोर्विधानात्। अथ पुत्रजन्म
निमित्तस्य ग्रहणनिमित्तस्य निमित्तानन्तर्यमस्त्विति चेत्। न विवाहोपनयननिमित्तस्य तदानन्त
र्यनियमाभावात्। अतो निमित्तानन्तरं सर्वं नैमित्तिकमिति सामान्यतो वक्तुं न युज्यते। अथ निय
तनिमित्तं श्राद्धं निमित्तानन्तरमिति चेत्। न निमित्तस्य नियतत्वानियतत्वयोर्निरूपयितुमश
क्यत्वात्। अथावश्यंभावित्वं नियतत्वं। अनवश्यंभावित्वमनियतत्वमिति चेत्। न पुत्रजन्मादे
रवश्यंभावित्वं नास्तीति ते न्निमित्तस्याप्यवश्यंभावित्वात्। अथ वंध्याविषये पुत्रजन्मनिमित्तस्य नियतिर्नास्तीति। मूकविषये उपनयनस्य नियतिर्नास्तीति वा
त्तर्हि वीतरागविषये विवाहस्य नियतिर्नास्ति।

हर्निमित्तस्याप्यनियतत्वं स्यात्। अथ विवाहादेर्नियतकालत्वान्नियतत्वं। पुत्रजन्मादेरनियत
कालत्वादनियतत्वमिति चेन्न। विवाहादेरप्यनेकमासेष्वनेकनक्षत्रेषु क्रियमाणतया नियत
त्वाभावात्। तस्मान्निमित्तस्य नियतत्वानियतत्वे निरूपयितुं न शक्येते। अत्रोच्यते। नियतका
१३५ लत्वादेव निमित्तस्य नियतत्वं ज्योतिःशास्त्रोक्तर्तुमासपक्षतिथिनक्षत्रलग्नप्रशस्तिवारादावात्।
कालस्यानियतिः। पुत्रजन्मनस्तु शास्त्रोक्ततिथिनक्षत्रप्रशस्तिवारादनियतकालतयाऽनिय १३५
तत्वमिति। एवमन्यत्रापि नियतत्वानियतत्वे ऽभ्यूह्ये। अतो नियतनिमित्तं प्रातरनियतनिमित्तं
निमित्तानन्तरमिति निश्चयः। नियतेष्वनिमित्तेषु प्रातर्होमनिमित्तकानां तेषा
मनियतत्वे तदानन्तर्यं स्यात्। अत्रिरपि। पूर्वाह्णे वैश्वदेवं हि दिने तु जन्मनिमित्तकं। पुत्रजन्मनि कु

र्वीत श्राद्धं तात्कालिकं स्मृतम्। बुध इति। पुत्रजन्मनीत्यनियतनिमित्तोपलक्षणम्। तात्कालिकं पु
त्रजन्मानन्तरम्। पुपाङ्कुर्वे पुत्रपुत्र्योः ग्रहणे चन्द्रसूर्ययोः। स्नात्वानन्तरमात्मीया
न्पितॄन् श्राद्धेन तर्पयेत्। नान्दीमुखनिमित्तान्याह। सीमंतव्रतचौडा नामकरणान्नप्राशनोपनय
न स्नानाधानविवाहयज्ञतनयोत्पत्तिप्रतिष्ठासु च। पुंसूत्यावसथप्रवेशनसुताद्यास्यावलोका
श्रमस्वीकाराङ्कितिपाभिषेकदयिताद्यर्तौ च नान्दीमुखं। सीमंतं सीमन्तोन्नयनं। व्रतानि प्राजापत्या
ग्नेयवैश्वदेवसौम्यगोदानव्रतानि। चौडं चूडाकरणं। सुतस्य नामनिर्देशः। अन्नप्राशनं सुतस्य
प्रथमान्नभोजनम्। उपायनमुपनयनम्। स्नानं समावर्तनं। आधानमग्न्याधानं। विवाहः सुतस्य सु
तायाश्च। यज्ञो दर्शपौर्णमासज्योतिष्टोमादिः। तनयोत्पत्तिः पुत्रोत्पत्तिः। प्रतिष्ठासु देवताप्रतिष्ठा

Indira Gandhi National
Centre for the Arts

सु।वापीकूपतडागारामादिप्रतिष्ठासु।पुंसूतिःपुंसवनं।ध्रुवसथप्रवेशः।प्रथमगृहप्रवेशः।
सुतस्याद्यावलोकः।प्रथमंमुखप्रेक्षणम्।आश्रमस्त्रीकारावान प्रस्थाद्याश्रमस्त्रीकारा क्षितिपा
लिषेकोराज्ञ्याभिषेकःदयितापुत्तुलाचार्योया।अथमरणप्राङ्गुलीविः।एतेषुनिमित्तेषुपुमाञ्चार्द्ध
मुखंविदध्यादित्यर्थः। नामान्नवोडगोदानसोमोपनयनपुंसवोस्नानाधान
विवाहेषुनांदीश्राद्धंविधीयते। कन्यापुत्रविवाहेषुप्रवेशेनववेश्मनः।नामकर्माणि १३६
बालानांचूडाकर्मादिकेतथा।सीमंतोन्नयनेचैवपुत्रादिमुखदर्शने।नांदीमुखान्पितृगणान्पूजये
त्प्रयतोगृही। पुत्रोत्पत्तिप्रतिष्ठासुतन्मौंजीत्यागबंधने।चूडायांचविवाहेषुवृद्धिश्राद्धंवि
धीयते। अन्याधानाभिषेकेषुइष्टापूर्त्तक्रियासुतो।वृद्धिश्राद्धंप्रकुर्वीतत्याश्रमग्रह

णंतथा। उत्सवानंदसंतानयज्ञोद्वाहादिमंगले।मातरःप्रथमंपूज्याःपितरस्तदनंत
रम्।ततोमातामहानांचविश्वेदेवास्तथैवच। कन्यादिकामिनःकुर्युःश्राद्धंपार्वणवत्सदा।क
पक्षाद्यासुतिथिषुवर्ज्ययित्वाचतुर्द्दशीं।कन्यादिकामिनःकुर्युःश्राद्धंपार्वणवत्सदा।क
न्यादिकामिनःकन्यांकन्यावेदिनश्चेत्यादिवाक्योक्तचतुर्द्दशफलकामिनःपंचदशसुतिथिषुप्रति
पत्प्रभृतिषुपार्वणविधिनाश्राद्धंकुर्युः।नतुचतुर्द्दशफलकामिनःपंचदशतिथिषुकथंश्राद्धंकुर्यु
रित्याह।वर्ज्जयित्वाचतुर्द्दशीम्। कन्यांकन्यावेदिनश्चपशुद्रविणसंपदः।द्यूतं
कृषिंचवाणिज्यंद्विशफैकशफांस्तथा।ब्रह्मवर्च्चस्विनःपुत्रान्स्वर्णरौप्येसकुप्यके।ज्ञातिश्रेष्ठ्यंसर्व
कामानाप्नोतिश्राद्धदःसदा।प्रतिपत्प्रभृतिष्वेकांवर्ज्जयित्वाचतुर्द्दशीं।कान्यांतरमाह।कृत्तिकादि

Indira Gandhi National
Centre for the Arts

पुत्रार्थेषु स्वराण्येनेषु पार्वणम्॥ कुर्युः श्राद्धं श्रद्दधानाः स्वर्गादिफलकामिनः॥ स्वर्गं ह्यपत्यमित्यादि
ववनोक्तफलकामिनः॥ स्वर्गं ह्यपत्यमोजश्च शौर्यं क्षेत्रं बलं तथा। पुत्रान् श्रेष्ठ्यं च
सौभाग्यं समृद्धिं मुख्यतां शुभं। प्रवृत्तचक्रतां चैव वाणिज्यप्रभृतीनपि। अरोगित्वं यशो वीतशोकतां
परमां गतिं। धनं वेदान् भिषक्सिद्धिं कुप्यं गामप्यजाविकं। अश्वानायुश्च विधिवद्यो वा श्राद्धं प्रय
च्छति। कृत्तिकादिभरण्यंतं स कामानाप्नुयादिमान्॥ काम्यांतरमाह। विष्कंभादिषु योगेषु फलं न १३७
क्षत्रवत्स्मृतं। विष्कंभादिषु योगेषु श्राद्धे दत्ते कृत्तिकादिषु नक्षत्रेषु यत्स्वर्गादिफलं तद्भवति।
विष्कंभे श्राद्धे करणे स्वर्गं ह्यपत्यमित्यादिक्रमेण फलं भवतीत्यर्थः॥ कृत्तिकादिषु
ऋक्षेषु यद्देवफलमीरितं। विष्कंभादिषु योगेषु तदेव फलमश्नुते। काम्यांतरमाह। श्राद्धं रव्यादि

वारेष्वारोग्यादिफलेप्सवः कुर्युः फलमिदं तेषां ववादिकरणेष्वपि। आरोग्यं
वसौभाग्यं शत्रूणां च पराजयं। सर्वान्कामान् श्रियं विद्यां धनमायुर्यथाक्रमं। इत्यादिदिवसेष्वेत प्रसं
ष्ठाद्धं कृत्स्नं लभते फलम्। ववादिकरणे चैतच्छ्राद्धं कृत्स्नं लभते फलम्। नित्यं नैमित्तिकं काम्यमिति
गात्र श्राद्धानां विशेषः उच्यते। श्राद्धं द्विविधमुद्दिष्टमेकोद्दिष्टं च पार्वणं। नित्यं ... यस्यागमस्तु श्राद्धं।
मत्र पुनस्त्रिधा। अदनीयस्य श्राद्धीयद्रव्यस्यापि हेतु उद्दिश्य प्रेतं वा द्विजस्य श्रद्धया यस्या ... तत्परिकी
प्रेतं पितृंश्चानिर्दिश्य परोऽप्यस्य स्वियमात्मनः श्रद्धया दीयते यत्तु श्राद्धं तत्परिकी
र्तितम्। अयमर्थः तच्छ्राद्धमेकोद्दिष्टपार्वणरूपेण द्विविधमुद्दिष्टमुक्तं। एकमुद्दिश्य यद्दीयते
तदेकोद्दिष्टम्। त्रिपुरुषोद्देशेन यद्दीयते तत्पार्वणं। एकमुद्दिश्य यच्छ्राद्धमेकोद्दिष्ट

Indira Gandhi National
Centre for the Arts

मुदीरितं।त्रीण्‍युद्दिष्टान्यथ श्राद्धं पार्वणं मुनयो विदुः। एकोद्दिष्टं पार्वणं च प्रत्येकं नित्यनैमित्तिक
काम्यरूपेण त्रिधा प्रकारं भवति। मृताहे हरहर्महालये दर्शे च यच्छ्राद्धं तन्नित्यं।
मृताहे हरहर्दर्शश्राद्धं यच्च महालये। तन्नित्यमुदितं सद्भिर्नित्यवत्तद्विधानतः। नवश्राद्ध
प्रभृति सपिंडीकरणान्तं प्रेतश्राद्धम्। ग्रहणेषु संक्रान्तिषु च श्राद्धं वृद्धिश्राद्धं संवत्सरोत्कुंभश्रा
द्धं च नैमित्तिकं। प्रेतश्राद्धं सपिंडान्तं संक्रान्तिग्रहणेषु च। संवत्सरोत्कुंभे च तच्छ्रा १३८
द्धं निमित्ततः। तिथिवारनक्षत्रयोगकारणेषु मन्वादिषु च व्यतीपातयोगेषु अर्धोदयादिषु च यच्छ्र
श्राद्धं तत्काम्यं। तिथ्यादिषु च यच्छ्राद्धं मन्वादिषु युगादिषु। फलसंयुक्तयोगेषु तत्का
म्यं समुदाहृतं। यत्तु स्मृत्यन्तरे। नित्यं नैमित्तिकं काम्यं वृद्धिश्राद्धमतः परं। पार्वणं चेति विज्ञेयं श्रा

द्धं पंचविधं बुधैरिति। तथा। यच्छ्राद्धं दशरहः श्राद्धं पार्वणं वृद्धिसंभवं। एकोद्दिष्टं सपिंडं च मितिपं
चविधं विदुरिति। तदापाततः। परमार्थतः पंचविधत्वम् आसां संभवाच्चैविध्यमेव प्रागुक्तमित्यफलांवा
लवंडकुलकैरवचंद्रक्षोणिपालजटमल्लविलासो श्रीधरस्य कृतिनः कृतिरेषा संततं कृतिमुदे
समस्त्‍॥
तदुक्तं प्राचीननिबंधे। कर्कटो मकरः सिंहः कुंभो लि
इषभस्तथा। मेषः कन्या धनुर्मीनो मिथुनश्चेति संक्रमाः। द्वादशात्र क्रमादुद्यावयने दक्षिणोत्तरे
विषुवे तत्परो होत्र चत्वारः सदनंतराः। षडशीतिमुखाः प्रोक्ताः चलिन्द्रविकाः। कर्कटादयो मिथु
नानांता द्वादश संक्रमा त्रयः। इति शाद्दः प्रकार वचनः। एतेषु द्वादश संक्रमेषु मध्ये श्राद्धो संक्र

Indira Gandhi National
Centre for the Arts

मोर्दक्षिणोत्तरे अयने स्यातां। कर्कटो दक्षिणायनं मकर उत्तरायनमित्यर्थः। अमत्रराश्चत्वारः
संक्रमाः। सिंह कुंभ वृश्चिक वृषा विष्णुपदाः स्युः। ततोनन्तरं द्वौ संक्रमौ दक्षिणोत्तरे विषुवे स्यातां
तुला दक्षिण विषुवं मेष उत्तर विषुवमित्यर्थः। तदन्तराश्चत्वार कन्या धनुर्मीन मिथुनाः षड
शीतिमुखाः प्रोक्ताः॥४॥ अयने विषुवे द्वे च चतस्रः षडशीतयः। चतस्रो विष्णुपद्यश्च
संक्रान्त्यो द्वादश स्मृताः। मृग कर्कट संक्रान्ती द्वे तूदग्दक्षिणायने। विषुवे द्वे तुला मेषौ गोलमध्ये त १३९
तोपराः। मृगो मकरः। तथा कन्यायां मिथुने मीने धनुष्यपि रवेर्गतिः। षडशीतिमुखाः प्रोक्ताः ष
डशीतिगुणाः फले। वृष वृश्चिक कुंभेषु सिंहे चैव रवेर्गतिः। नक्षमलमासेन सह कदाचित् त्रयो द ३२
श संक्रान्तयो लक्ष्यन्ते इत्येव कारार्थः। तत्र विशेषाः समा तुल्याः संक्रान्ति विहित कर्म्मणां। साव
ग्र २

संक्रान्तिरेकैकैव मेषादि रूपाः सप्तधा ज्ञेयाः। तच्छृणु मंदा मंदाकिनी ध्वांक्षी घोरा चैव महो
दरी राक्षसी मिश्रिता चैव संक्रान्तिः सप्तधा स्मृता। मंदा ध्रुवेषु विज्ञेया मृदौ मंदाकिनी तथा। क्षिप्रे ध्वां
क्षी विजानीयात् उग्रे घोरां प्रचक्षते। चरे महोदरी ज्ञेया क्रूरे च राक्षसी स्मृता। मिश्रिता चैव निर्द्दि
ष्टा मिश्रितर्क्षे संक्रमे। श्रवणांत्री उत्तरा त्रि रोहिणी एषु ऋक्षेषु जायमाना संक्रान्तिर्मंदानाम। पू
र्वं सर्वत्र ज्ञेयम्। मृदु निश्चत्वरा धा चित्रा रेवती मृगशीर्षाणि। क्षिप्रा हस्ताश्विनी पुष्याः। उग्राः पूर्वा
त्रयं भरणी मघाश्चा चराः। पुनर्वसु धनिष्ठा श्रवण स्वाति शततारकाः। क्रूरा मूल ज्येष्ठाश्लेषाः। मिश्रा
कृत्तिका विशाखा च। आसां फल विशेषोपि देवीपुराणादावुक्तः। मंदा द्विजेषु विज्ञेया राज्ञां मं
दाकिनी तथा। ध्वांक्षी विट्सु विज्ञेया घोरा शूद्रेषु स्मृता। महोदरी च घोराणां शौंडिकानां च

Indira Gandhi National
Centre for the Arts

हा॥ राक्षसी राक्षसानां तु ये चान्ये क्रूरकर्म्मिणः॥ सर्वेषां चैव कारूणां मिश्रिता तृप्तिवर्द्धिनी॥ तृपा॥
मीदं तिष्ठवोह्नि मध्याह्ने तु द्विजोत्तमाः॥ अपराह्ने तथा वैश्याः शूद्राश्चास्तमिते रवौ॥ पिशाचाश्च प्र
दोषे च अर्द्धरात्रे च राक्षसाः॥ अर्द्धरात्रे व्यतीते तु पीयन्ते नटनर्त्तकाः॥ उषःकाले तु संक्रान्तो हस्ति
गोस्वामिनो जनाः॥ अहं तिष्ठं जनन्नीता सर्वा संध्याकालेन संज्ञया॥ ब्रह्मपुराणेपि विशेष उक्तः॥
शुक्लपक्षे तु सप्तम्यां यदा संक्रमते रविः॥ महाजया तदा ख्याता सप्तमी भास्करप्रिया॥ स्नानं दानं ज
पो होमः पितृदेवादिपूजनं॥ सर्वं कोटिगुणं प्रोक्तं तपनेन महोजसा॥ यस्यां स्नपयेत्सूर्यं घृतेन
पयसाथवा॥ सोश्वमेधफलं प्राप्य विरंस्ये पुरे वसेत्॥ अना घर्थं पुण्यकालविभागमाह॥ कर्क
टसंक्रमे पूर्ववर्त्तिन्यस्त्रिंशन्नाडिकाः पुण्याः स्युः॥ मकरसंक्रमे उत्तरवर्त्तिन्यो विंशतिनाडिकाः पु १४०

कृ२

ण्याः स्युः॥ अतीतानागते पुण्ये द्वे उदग्दक्षिणायने॥ त्रिंशत्कर्कटके नाड्यो मकरे
विंशतिः स्मृताः॥ इति॥ एतयोरनन्तरेषु विष्णुपद्याख्येषु संक्रान्तिचतुष्टयेषु प्राक् षोडश नाडिकाः
पुण्याय विष्णुपदस्य प्राक् पश्चादपि षोडश॥ वि
द्वे षोडश नाडिकाः पुण्याः॥ दश प्राक् दश पश्चाच्च पुण्याः
षुवायनयोः संक्रान्तौ पूर्वं पश्चाच्च दश नाडिकाः पुण्याः स्युः॥ दशार्वाक् नाडि
स्तु विषुवाख्ययोः॥ वर्त्तमाने तुला मेषे नाड्यस्तूभयतो दश॥ षडशी
काः पुण्याः पश्चादपि विषुवति॥ षडशीतिषु अतीतासु षष्टिर्नाड्यः पुण्याः स्युः॥
त्यां व्यतीतायां षष्टिरुक्तास्तु नाडिकाः॥ षडशीतिमुखे तीते तत्रैव विषुवद्वये॥ भविष्य
त्ययने पुण्यमतीते चोत्तरायणे॥ अर्वाक् षोडश विज्ञेया नाड्यः पश्चाच्च षोडश॥ कालः पुण्योर्को

Indira Gandhi National
Centre for the Arts

संक्रान्तौ विंहद्भिः परिकीर्त्तितः॥ संक्रान्तौ पुण्यकालस्तु षोडशोभयतः कलाः॥ चंद्रसूर्यौ
परागेत्रया वहुश्रनगोचराः॥ षडशीत्यास्त्विलक्षणं ज्योतिःशास्त्रोक्तं॥ धनुर्मिथुनकन्यासु मीनेच
षडशीतयः॥ वृषवृश्चिककुंभेषु सिंहे विष्णुपदी स्मृता॥ कर्कटे मकरे विंद्यादयनं दक्षिणोत्तरौ॥
मेषे चैव तुलायां च विषुवे परिकीर्त्तितः॥ प्रकारांतरेण विशेषमुक्तः॥ अह
संक्रमणे पुण्यमहः कृत्स्नं प्रकीर्त्तितम्॥ संक्रमश्च निशीथे स्यात्तद्यामाः पूर्वपश्चिमाः॥ संक्रान्तिका १४२
ले विज्ञेयाः स्नानदानादिकं चरेत्॥ पूर्णे वार्द्धरात्रे तु यदा संक्रमते रविः॥ तदा दिनद्वयं
पुण्यं मुक्त्वा मकरकर्कटाविति॥ कर्कटे मकरे च विशेषमाह॥ प्रत्यूषे वा निशीथे वा यदि कर्कटस
संक्रमः॥ पूर्वस्मिन्न्दिने कुर्वीत स्नानदानादिकं नरः॥ प्रत्यूषे वा निशीथे वा मकरः संक्रमो परेत्व

श्रीतिप्रक्तं प्रत्यूषे वा प्रभाते वा निशीथे वा कर्कटसंक्रमो यदि स्यात्तदा पूर्वस्मिन्दिने स्नानदा
नादिकं कुर्वीत॥ प्रदोषे रजनीमुखे निशीथे अर्द्धरात्रे वा मकरसंक्रमो यदि स्यात्तदा परांह्ने स्नान
दानादिकं कुर्यात्॥ नरइति सर्ववर्णोपलक्षणम्॥ मुक्त्वा मकरकर्कटाविति॥ रात्रौ संक्रमणे पुण्य
मित्यादि निश्चयो मकरकर्कटव्यतिरिक्तविषय इत्यर्थः॥ प्युक्तं॥ धुना कर्कटसंक्रा
न्तिर्यदि स्यादंशुमालिनः॥ प्रभाते वा निशीथे वा कुर्यादहनि पूर्वतः॥ कार्मुकं तु परित्यज्य कन्यां संक्र
मते रविः॥ निशीथादर्वाक् संक्रमो यदि स्यात्तदा पुरातनश्चार्को मध्याह्नात् परं स्नानादिकर्म्मणि पुण्यो
भवेत्॥ निशीथादूर्द्ध्वं यदि संक्रमो भवेत्तदोत्तरवर्तनोऽवधः कालः संक्रान्तिपर्यन्तं स्नानादिकर्म्म
णि पुण्यो भवेत्॥ निशीथादूर्द्ध्वं यदि संक्रमो यदि संक्रमो भवेत्तदा॥ निशीति सिद्धांतवादः॥ निशी



Indira Gandhi National Centre for the Arts

थपदेनैव तदर्थस्यालभ्यमानत्वात्। रात्रौ संक्रमणे पुण्यं दिनार्द्धं स्नानदानयोः
अर्द्धरात्रादधस्तस्मिन्मध्याह्नस्योपरि क्रिया। ऊर्द्ध्वं संक्रमणे चोर्द्ध्वमुदयात्प्रहरद्वयमिति। निशीथस
मये यदि संक्रमो रवेस्तदा रात्रद्वितीयं स्नानादिकर्मणि पुण्यं मनीषिण आहुः निशीथात्पूर्व्वं मर्द्ध
रवाङ्कः पुण्य मित्यर्थः अयूषे कर्क्कटं रात्रः प्रदोषे मकरं यदि। संक्रमेत्पूर्व्व
नाड्यस्तु पुण्याः पूर्व्वोत्तराः स्मृताः। कालद्वये विशेषमाह। याया संनिहितानाड्यस्तास्ताः पुण्यतमाः 
स्मृताः। संक्रान्तौ पुण्यकालस्तु षोडशोत्तरयतः कलाः। चंद्रसूर्योपरागे तु यावद्दर्शनगोचरः। इ
ति जाबालिवचनं सर्व्वसंक्रान्तिपुण्यकालान्तरं विदधाति। तत्कालाचरणं तु सकलसंक्रान्तिविषयं न भ
वति किंतु विष्णुपदी विषयमिति। सर्व्वसंक्रान्तिविषयत्वे विध्यन्तरवाक्यकरणवाक्यभेदप्रसंगात्।

राहुदर्शनसंक्रान्तिविवाहात्ययवृद्धिषु स्नानदानादि
कं कुर्य्यान्निशि काम्यव्रतेषु चेति। विषुवत्सूर्य्यसंक्रमश्च तिथि। सूर्यस्य संक्रमे पुण्ये न स्नाया
द्यस्तु मानवः। सप्तजन्मानि रोगी स्याद्दुःखभागी च जायते। संक्रान्तौ या निदत्तानि हव्यकव्यानि मान
वैः तानि तस्मै ददाति तेऽर्कः सप्तजन्मनि निश्चयः। वशिष्ठा द्वेवोपासनादेरप्युपसंग्रहः।
उपोष्य च तु संक्रान्त्यां स्नातोऽयो रुचयेद्धरिं। ज्ञातः पंचोपचारेण सकाश्यफलमश्नुते। अ
यने विषुवेचैव त्रिरात्रोपोषितो नरः। स्नात्वा च पूजयेदीशं सर्व्वकामानवाप्नुते। अयने विषुवद्वि
ष्णुपद्योश्च षडशीतिषु। सदा मध्येऽपवर्गे कुर्यात्स्नानादिकं परं। अयने कर्क्कटे मकरे स्नाना
दिकं सदा कुर्यात्। यावान्पुण्यकाल उक्तस्तस्मिन्सर्व्वेऽपि कुर्यादित्यर्थः। विषुवती तुला मेषसं

क्रमणेमध्येकुर्यात्॥ षडशीतिमुपगमेकुर्यात्॥ अग्निमेलागे। कुर्यात्सदायने
मध्येविष्णुपद्यां विषुवति। षडशीत्यामंत्यलागेस्नानादिविधिनाइत्यर्थः इति। विष्णुमद्याद्कये
वत्रस्नानदानादिकं कृतम्। सहस्रगुणमुद्दिष्टंषडशीतिमुखेषुच। विषुवत्ययनेलक्ष्मु।
णं कोटिगुणं क्रमात्॥ विषुवतिलक्षगुणंअयनेकोटिगुणमित्यर्थः। द्य।
यनेकोटिगुणितं लक्षंचविषुवेफलम्। षडशीत्यांसहस्रंतुफलंविष्णुपदीषुच। अत्र विशेषं। १४३
तरमाह। पूर्वसंक्रांतिषुयःकालस्तदीयिष्ययनेतथा। अयनेविंशतिःपूर्वामकरे
विंशतिःपरेतिमेषादिसंक्रांतिषुयःकालःपुण्यस्तदीयायनेपिसएवकालःपुण्यः। मक
रायनेतुपूर्वेत्ताविन्पोविंशतिघटिकाःपुण्याःमकरसंक्रांतेरुत्तरत्रघटिकाविंशतिःपु

पर्वप्रति
पत्येत्यर्थः
पदोःसंधौग्रहणंचंद्रसूर्ययोः॥ पूर्वार्द्धतिथ्योरद्धार्द्धकालःस्यात्स्पर्शमोक्षयोः। पर्वपदेनामावा
स्यापोर्णमास्याउच्यते। पर्वप्रतिपदोःसंधावंतरालेसूर्यचंद्रमसोर्ग्रहणंभवति। तत्रचंद्रसू
र्ययोराहुस्पर्शमोक्षकालोयावांस्त्रिवत्तःपंचनाड्यात्मकेज्योतिःशास्त्रोक्तगणनयासिद्धस्
स्यार्द्धंपूर्वोत्तरतिथ्योःस्यात्॥ अयमस्तिसंधिःपर्वणोस्योरागःस्पर्शकालःप्रतिपदालागोमोक्ष
कालःस्यात्॥ अर्द्धार्द्धमितिसमलागविवक्षयानपुंसकनिर्देशः। तथाचग्रहणलक्षणमन्तो
क्तमिति। यावान्कालःपर्वणोस्तेतावान्प्रतिपदादिमः। रवीन्दुग्रहणेनेस्य
सपुण्योमिअणाद्भवेत्॥ अनेहाःकालः। तत्रकृत्यमाहसारते। गंगास्नानंप्रकुर्वीतग्रहणे

महानदीषु वाप्यासु स्नानं कुर्याद्यथा विधि। इंदोर्लक्षगुणं पुण्यं रवेर्दश

इसूर्ययोः महानदीषु वाप्यासु स्नानं कुर्याद्यथा विधि। इंदोर्लक्षगुणं पुण्यं रवेर्दश
गुणांतथा। गंगातोये तु संप्राप्ते इंद्वोः कोटीर्भवेद्दश। गवां कोटिप्रदानेन सद्ग्रहणेन यत्फलं।
गंगास्नाने तत्फलं स्याद्राहुग्रस्ते निशाकरे। दिवाकरे पुनस्तत्तु दशसंख्यमुदाहृतम्। कोटि
कोटिगुणितम्। दशसंख्यकोटिगुणम्। तिस्रो नद्यो महापुण्या वेणागोदावरी
वापीकूपतडागेषु गि
री। गंगाह्रदे संगताः प्राप्ता गंगा इति कीर्तिताः। एतासामसंभवे। २५५
रिप्रस्रवणेऽपि वा। नद्यां नदी देवखाते सरसीषु हुता पुनि। नद्योदकेऽपि वा स्नायात् ग्रहणे चंद्र
सूर्ययोः। अत्रोष्णोदकस्नानमातुरविषयम्। सर्वं गंगासमं तोयं सर्वे व्याससमा द्विजाः
सर्वं भूमिसमं दानं ग्रहणे चंद्रसूर्ययोः। आदित्यकिरणैः पूतं पुनः पूतं च वह्निना। अ

तोयाध्यातुरः स्नायाद्ग्रहणे भूस्रवारिणा। अत्र सामान्येन गंगादिषु स्नायादित्युक्तं। फलतार
तम्यं तु मार्कंडेयपुराणोक्तं बोद्धव्यम्। भूमिष्ठमुद्धृतात्पुण्यं ततः प्रस्रवणोदकं। ततो
पि सारसं पुण्यं ततः पुण्यं नदीजलं। तीर्थतोयं ततः पुण्यं महानद्यं तु पावनं। ततस्ततोऽपि गंगा
तु पुण्यं पुण्यमतो द्युस्थिः। शीतमुष्णोदकात्पुण्यमपारक्यं परोदकात्। स्नात्वा यथाविधि वृद्धा
द्धं कुर्यात्। व्यतीपातस्ययोगो यावांछ्रेचंद्रसूर्यग्रहणे क्षणः। गजच्छाया तु साश्रा
क्षापि त्र्यहणां दत्तमक्षयम्। सर्वस्वेनापि कर्तव्यं श्राद्धं वै राहुदर्शने। अकुर्वाणस्तु
नास्तिक्यात् पंके गौरिव सीदंति। अत्र च शृंगोऽपि तं चंद्रसूर्यग्रहेष्य त्र श्राद्धं विधिवदाचरेत्। तेन च
सकला पृथ्वी दत्ता विप्रस्यैव करे। विधिवदामश्राद्धं कुर्यात्। आपद्यनेतथि

त्रग्रहणे चंद्रसूर्ययोः॥आमश्राद्धं द्विजः कुर्यात्शूद्रः कुर्यात्सदेव हि।दद्याद्भूमिंच विप्रेभ्यः पात्रेभ्यो
ब्राह्मणाय वा।तत्समं वा सुवर्णादि स्पर्शकाले प्रशस्यते। अयने विषुवे चैव ग्र
हणे चंद्रसूर्ययोः।पात्रभूताय विप्राय दद्याद्भूमिं सदक्षिणां।विद्यातपोभ्यां संपन्नो विप्रः पात्रं।
न विद्यया केवलया तपसा वापि पात्रता।यत्र वृत्तमिमे चोभे तद्धि पात्रं प्रचक्षते।त
थाविधपात्राभावे ब्राह्मणाय श्रोत्रियाय वा देयम्॥ब्राह्मणश्रोत्रियालाभे ब्राह्मणब्रुवाय नामा २५५
धारकाय वा दद्यात्॥ऋग्यजुःसामाथर्वणशाखानामन्यतमशाखाध्यायी श्रोत्रियः॥एकांशाखाम
धीत्य श्रोत्रिय इति बौधायनस्मरणात्॥गर्भाधानादिसंस्कारसंस्कृतोनधीतवेदो ब्राह्मणः ब्रुवः
गर्भाधानादिसंस्कारवेदोपनयनेस्तु तथा नाध्यापयति नाधीते स भवेद्ब्रा

ल णब्रुवः गृहीतगायत्रीमात्रो वेदाध्ययनरहितो नामधारकः॥ गायत्री
मात्रसारा ये संध्यामात्रउपासकाः।अज्ञानात्कष्टकर्माणो ब्राह्मणा नामधारकाः॥ब्राह्मणजातिमा
त्रक संस्काररहित स्व ब्राह्मणाः॥ ब्रह्मवीर्यसमुत्पन्नो मंत्रसंस्कारवर्जितः।
जातिमात्रोपजीवी च योसाव ब्राह्मणः स्मृतः॥ अश्रोत्रियः श्रोत्रियो वा अपात्रं पा
त्रमेव वा।विप्रब्रुवोपि वा विप्रो ग्रहणे दानमर्हति।व्यासस्थाः सर्वे गंगासमं तोयं सर्वे व्याससमा द्वि
जाः॥ग्रहेष्वसंभवे तत्समं सुवर्णादि वा दद्यात्॥श्राद्धपदार्थादीनां परिग्रहः।
भूमिर्गावः सुवर्णं वा धान्यं वा यद्यदीप्सितम्।तत्सर्वं ग्रहणे देयमात्मनः श्रेय इच्छता।प्रतिग्रहीतुः
पात्रापात्रतस्थेन फलतारूपं दक्षोक्तम्॥सममब्राह्मणे दानं द्विगुणं ब्राह्मणब्रुवे श्रोत्रिये श
ते

Indira Gandhi National
Centre for the Arts

तसाहस्रंपात्रेवानंत्यमश्नुते।किंवास्नानादिकर्म्मणः सर्वैः स्पर्शकालःप्रशस्यते।मध्यमोमध्य
कालःस्यान्मोक्षकालःकनीयसः॥ त्रिदशाःस्पर्शसमयेतृप्यंतिपितरस्तथा।मनु
ष्यामध्यकालेतुमोक्षकालेतुराक्षसाः।अत्रचसूतकादौविशेषउक्तोलिंगपुराणे।चंद्रसूर्यग्रहे
स्नायात्सूतकेमृतकेपिवा।अस्नायीमृत्युमाप्नोतिस्नायीपापंनविंदति।सूतकेमृतकेचैवनदो
षोराहुदर्शने।तावदेवभवेच्छुद्धिर्यावन्मुक्तिर्नदृश्यते।अत्रपूर्ववाक्यंस्नानविधिपरं।उत्तरं १४६
वचनंदानादिविधिपरं।अतोनपौनरुक्त्यं।अन्यथावचनद्वयस्यैकस्मृतिकवाक्येनकल्प्या
पत्तेरिति। मात्रेकर्मपरित्यागोराहोरन्यत्रदृश्यते।शौतेकर्म्मणितत्का
लस्नातःशुद्धिमवाप्नुयादिति। सर्वेवर्णाःसूतकेपिमृतकेराहुदर्शनेस्नात्वाशौ
इंधप्रकुर्वीरन्दानशाध्यंविवर्जिताः।अतोग्रहणेसूतकेमृतकेवानरःस्नानादावधिकारी।किंच
तो अशौचंजायतेचूर्णाग्रहणेचंद्रसूर्ययोः।राहुस्पर्शेतयोःस्नात्वादाना
दौकल्पतेनसःकल्पतेयोथोत्सवति॥ सर्वेषामेववर्णानांसूतकेराहुदर्शनेस्ना
त्वाकर्म्मणिकुर्वीतशृतमन्नंविवर्जयेत्।किंचान्यदप्युक्तंमहाभारते।अत्रोयामत्रयादिविद्य
ग्रहणेतुविमाचरेत्।चतुर्यामादध्यश्चैवराहुग्रस्तेदिवाकरे। सूर्यग्रहेतुन
स्नीयात्पूर्वंयामचतुष्टयं।चंद्रग्रहेतुयामांस्त्रीन्वालवृद्धातुरैर्विना।वालादिषुविशेषमा
हमत्स्यः।अपराह्णेचनमध्याह्नेमध्याह्नेनतुसंगवे।भुंजीतसंगवेचेत्स्यान्नपूर्वंभोजनक्रिया।
तथानमनः।चंद्रसूर्यग्रहेनाद्यादद्यात्स्नात्वाविमुक्तयोः।अत्रयामत्रयोयामचतुष्टयेनभुंज

Indira Gandhi National
Centre for the Arts

तेति वचनात्सूर्ये भुंजीतेत्यवगम्यते। ग्रहणं तु रवे दिवसे प्रथमार्धयामतः भुंजी
तावन्नास्तं पश्चिमे प्रथमार्धः। रात्रौ प्रथमाद्यामतो ग्रहणं चेद्यावन्मध्याह्नात्पूर्वं भुंजीत
रात्रिपश्चिमयामे चेत्त्रिपश्चिमयामार्धं भुंजीतेत्यर्थः। स एवाह। रवेस्तावन्नाद्धर्मवो
गवृन्निशीथतः। चतुर्थप्रहरे चेत्स्याच्चतुर्थप्रहरार्धतः। अत्र चतुर्थप्रहरे रविग्रहणं चेत्तत्र
तुर्थप्रहरार्धं भुंजीतेत्यर्थः। निशीथो मध्यरात्रं। ग्रस्तोदये विधोः पूर्वो नाहस्ते जिनमात्रेण। १४७
विधोश्चंद्रमसो ग्रस्तोदये सति दिवसेऽग्रहणमिति ग्रहणात्पूर्वं नाश्लिलो जनं कुर्यादित्यर्थः अ
हरिति कालाध्वनो वि ति द्वितीया। थेदृश्य यदि वा तानोर्यस्मिन्नहनि लग्नं
वा ग्रहणं तु रवेस्तस्मिन्नपूर्वे भोजनं तथा। आवरे तं यदृश्येवं तथैवास्तमुपागतो यावन्नयो

दयः स्यान्नाश्नीयात्तावदेव वा मुक्तिं दृष्ट्वैव भुंजीत स्नानं कृत्वा ततः परं ग्रस्तावेवास्तमानि
रवीन्दू प्राप्नुतो यस्मिंस्तयोः परेद्युरुदये स्नात्वाभ्यवहरेन्नरः। निगदव्याख्यातमेतत्। अ
मुक्तयोरस्तगतयोः दृष्ट्वा स्नात्वा परेहनि। अत्राहनीति पदं तिथिपरं तथैवास्त
पागत इति। संध्याकाले यदा राहुर्ग्रसते शशिभास्करौ तदहन्नैव भुंजीत रात्रावपि
कदाचन। शशिनि ग्रस्तास्तमिते अहन्नैव भुंजीत। भास्करे ग्रस्तास्तमिते रात्रौ न भुंजीतेत्यर्थः
कदाचनेति धारणया त्वत्र स्थपौर्णमास्या स्थितिथिनक्षत्रादिनिमित्तकाद्योपवासव्रतस्य
स्य निषेधः। अत्र विशेषमाह। अहोरात्रं न भुंजीत ग्रस्तावेवास्तगौ यदि रवीन्दू यदि राहुग्र
स्तावेवास्तगौ स्यातां तदा समस्तमहोरात्रं न भुंजीत। अयमर्थः। अस्तगे सूर्ये ग्रहणात्पूर्वस्मिन्नहनि प

Indira Gandhi National
Centre for the Arts

रघ्यांरात्रौनभुंजीत।अस्तास्तगेअग्निर्नियग्रहणात्पूर्वेद्युरात्रौपरस्मिन्नहनिचभुंजीतेति।
अहोरात्रंनभोक्तव्यंचंद्रसूर्यग्रहोयदा।मुक्तिंदृष्ट्वातुभोक्तव्यंस्नानं
कृत्वाततःपरमिति।नन्वमेघाद्यावरणादिनायदिरवीन्द्वोर्मुक्तिर्नदृश्यतेतदाभोजनंनस्या
न्नमेवंचात्रुपदर्शनंविनापिज्योतिःशास्त्रोक्तरीत्यादर्शनसंभवान्न।अतएवाद्यामाद्याविमु
क्तयोरित्येतावदेवोक्तंनदृष्टेति। मेघमालादिदोषेणयदिमुक्तिर्नयंदृश्यते।आक १५८
लय्यतुतंकालंभुंजीताथाविशंकितः।यदिचदृष्टेत्येवद्यानदाहदर्शेश्रात्रुपृज्ञानपरवेचक्षु
षेवदर्शनेतत्स्यान्नानन्नुतथोक्तं।किंचचंद्रसूर्यग्रहेनाद्यादह्न्यस्मिन्नहनिपूर्वतः।राहोर्विमुक्तिं
विज्ञायस्नात्वाकुर्वीतभोजनम्।यःसमर्थोपिनिषिद्धकालेभुंक्तेतंप्रत्याहकात्यायनः।चंद्र

सूर्यग्रहेभुक्त्वाप्राजापत्येनशुध्यति।तस्मिन्नेवदिनेभुक्त्वात्रिरात्रेणैवशुध्यति।ग्रहणकालेभो
जनेप्राजापत्यम्।ततःपूर्वंनिषिद्धकालेत्रिरात्रमितिविवेकः।अत्रविशेषान्तरमाह।रवेरि
न्दोश्चस्ववारेयदिग्रहणंतदातत्रस्नानादिकंफलानंत्यायभवति। स्ववारेरवेरिंदो
ग्रहश्चूडामणिःस्मृतः।स्नानदानादिकंतत्रफलानंत्यायकल्पते। सूर्यवारेरवेर्ग्रासःसो
मवारेशशिग्रहः।चूडामणिरितिख्यातःस्नानदानंतफलंरवेः।वारेष्वन्येषुयत्पुण्यंग्रहणेइन्दु
सूर्ययोः।तत्पुण्यंकोटिगुणितंग्रहेचूडामणौस्मृतं।उपोष्यचैकरात्रंस्नात्वादानंसमाचरेत्।सप
पकोद्यनिर्मुक्तोब्रह्मलोकेमहीयते।कौशःपंजरं। यस्त्रिरात्रमुपोष्यैवग्रहणेचं
द्रसूर्ययोः।स्नात्वादत्वाचविधिवन्मोदतेब्रह्मणासह।एकरात्रमुपोष्यैवस्नात्वादत्वाचशक्तितः।

Indira Gandhi National
Centre for the Arts

कंबुकादिच सर्प्पश्च निःकृतिः पापकोशात इति [illegible]

तल्लक्षणं च। संक्रान्तिरहितो मासो मलमासः प्रकीर्तितः। मलिम्लुचापराख्यश्च संक्रान्ति
द्वययुक्तथा। सद्यान्मासिमेकं वापि ष्ठवोयं शुद्ध उत्तरः। मलिम्लुचापराख्य इति मलिम्लुच इत्यप
राख्या संज्ञा यस्य स तथा। संक्रान्तिद्वययुगपि तथा मलमासो भवतीत्यर्थः। स मलमासः क्वापि मा
सि यदि स्यात्तदार्थं पूर्वो मासो मलमासः स्यात्। शुद्धो मास उत्तरस्तावीश्यात्। असंक्रा २४९
न्तिमासो धिमासः स्फुटः स्यात् द्विसंक्रान्तिमासः क्षयाख्यः कदाचित् क्षयः कार्त्तिकादित्रये नान्यतः
स्यात्तदा वर्षमध्ये धिमासद्वयं च। यन्मासे संक्रान्ती रवेः सकलकर्म्मह त्तमलमास४।
अमावास्याद्वयं यत्र रविसंक्रान्तिवर्जितं। मलमासः स विज्ञेयो मासः शुद्धाख्य उत्तरः४।

कसित२

मासे संवत्सरे चैव तिथिद्वैधं यदा भवेत्। उत्तमस्तूत्तरो ज्ञेयः पूर्वः स्यात्तु मलिम्लुचः४।
गृह्यो। यस्मिन्प्रसिद्ध संक्रान्तिः संक्रान्तिद्वयमेव वा। मलमासः स विज्ञेयो मासः स्यात्तु त्रयोदश।
राशिद्वयं यत्र मासे संक्रमेत दिवाकरः। नाधिमासो भवेदेष मलमासः स केवलमि
ति। असावधिकमासो न भवति केवलं मलमाससंज्ञः स इत्यर्थः। अत्र कृत्यविभागमाह द्वादशाह
सपिण्डान्तकर्म्म ग्रहणजन्मनोः सीमन्ते पुंसवे श्राद्धं ह्यावर्तो जन्मकर्म्म च। रोगरुग्णान्निरलस्येत च
योगे श्राद्धं व्रतानि च। प्रायश्चित्तं निमित्तश्च दानात्सर्वे परत्र वा। मरणादारभ्य दहनं न मघ्रद्धाद
नं तिलोदकपिण्डदाननवश्राद्धद्वादशाहहोमषोडशश्राद्धसपिण्डनमित्येतत्सापिण्डीकरण
तं कर्म्मेत्यर्थः। ग्रहणाद्वये पुत्रजन्मनि सीमन्ते पुंसवने च विहितश्राद्धं तावेव द्वौ सीमन्तपुंसवौ। अ

Indira Gandhi National
Centre for the Arts

तकर्म्मेवा आहिताग्नेरिष्टिः अनाहिताग्नेर्होमः। रोगशान्तिर्नक्षत्रशान्त्यात्मिका। दानात्मिका प्रा
यश्चित्तात्मिका च। अलभ्ययोगे अर्द्धोदय महाव्यतीपात कपिंजल षष्ठ्यादौ विहितनित्याद्यनि
त्यानित्यशब्दाद्दानाद्युपरिग्रहः। महाव्यतीपातलक्षणं गार्ग्योक्तं। पंचाननस्थौ गुरुभूमिपुत्रौ
मेषे रविः स्याद्यदि शुक्लपक्षे। मासासिधाना करभेन युक्ता महाव्यतीपात इतीह योगः। पंचान
नः सिंहः। मासासिधाना द्वादशी। करभो हस्तनक्षत्रं। प्रायश्चित्तं। संध्योपासनाद्यकरणे यद्वि २५०
हितं। गोवधादौ च यद्विहितं। एतत्सर्वोक्तं कर्म्म निमित्तवशाद्यदा पूर्वमासे स्यात्तदा पूर्वमासे
कुर्यात्। यदोत्तरमासे निमित्तमुत्पद्यते तदोत्तर एव कुर्यात्। यदा मासद्वये निमित्तमुत्पद्यते तदो
भयत्र कुर्यादित्यर्थः। जातकर्म्मणि यच्छ्राद्धं नवश्राद्धं तथैव च। ग्रहणे पुंसवादौ च तत्र

थैपरत्र चेति। निमित्तवशादिति शेषः। आदिशब्दात्सीमंतालभ्ययोगरोगाणामुपसंग्रहः।
जातकर्म्मणि यच्छ्राद्धं नवश्राद्धं तथैव च। प्रतिसंवत्सरं श्राद्धं पूर्वमासे पितृस्मृतं। अपिशब्दा
त्पूर्वत्र परत्र वा निमित्तवशादिति। चंद्रसूर्यग्रहे चैव मरणे पुत्रजन्मनि। मलमासेपि
देयं स्याद्दत्तमक्षयकारणं। सत्यतपाः मलिम्लुचाख्ये मासे विपद्येत यदि द्विजः। तस्मिन्नपि च क
र्त्तव्याः पिण्डदानोदकक्रियाः। द्विजपदं वर्णमात्रोपलक्षणं। योगे चालभ्ययोगे च सीमंते पुं
सवेपि च। यद्दानादि समुद्दिष्टं पूर्वत्रापि न दुष्यति। जातकर्म्म च पुंसवनं सीमं
तोन्नयनं ज्ञातमलिम्लुचेपि कुर्वीत निमित्तं यदि जायते। चकारादलभ्ययोगोक्तव्रतानां का
म्यात्मकव्रतानां चोपसंग्रहः। तथा यदपि ग्रहोक्तं समवाप्य मलयुगादिषु। आद्यंदर्शोपि

Indira Gandhi National Centre for the Arts

II

दूरह:श्राद्धहनाब्दिमासिकंमलिम्लुचाख्येन्यमासेषुमृतानांश्राद्धमाब्दिकं।श्राद्धंचपूर्वेद्युष्टेषुती
र्थेषुचयुगादिषु।मन्वादिषुचयद्दानंदानंदैनंदिनंचयत्।तिलगोभूहिरण्यानांसंध्योपासनयोः
क्रिया।पूर्वहोमश्चाग्रयणंसाग्नेरिष्टिश्चपर्वणोः।नित्याग्निहोत्रहोमश्चदेवतातिथिपूजनं।स्नानंच
स्नानविधिनाप्यलक्ष्यापेयवर्जनम्।तर्पणंचनिमित्तस्य।नित्यवाद्युत्तयत्रच।मृतस्यसंवत्सरादर्वाक्
सपिण्डीकरणेसंवत्सरंयावत्।प्रत्यहंयत्सोदकुंभश्राद्धंविहितंतच्चोदकुंभं।मन्वादिषुयुगादिषु।
महालयेचविहितंश्राद्धं।यावज्जीवंप्रतिदिनंश्राद्धं।अहरहःश्राद्धं।ऊनमासिकऊनषाण्मासिक १५१
ऊनाब्दिकान्तमासिकमनमासिकं।मलिम्लुचादन्येषुमासेषुमृतानामाब्दिकंश्राद्धं।पूर्वेद्युष्टेषुश्रा
द्धेषुतीर्थेषुमातृगतत्वात्।तोयद्विहितंश्राद्धं।एषुदृष्टेषुमन्वादिषुयुगादिषुयद्दानंदैनंदिनं।

ह॰

विहितं।तिलगोभूहिरण्यानांयद्दानं। [illegible] ब्राह्मणानांदेयमित्यंगोभूहिरण्यतिलादि
क्षिसंध्यायाःक्रियासाग्नेरनग्नेश्चअनग्नेरौपासनस्य।क्रियापर्वहोमःपर्वस्थालीपाकः।आग्रयणंसा
ग्नेरनग्नेश्च।पर्वणोर्दर्शपूर्णमासयोरिष्टिः।नित्याग्निहोत्रहोमःदेवतायाअस्तिमतायाःप्रतिदि
नं।अतिथेश्चपूजनम्।साग्नेरनग्नेश्चस्नानविधिनास्नानं।अलक्ष्यानांकलंजादीनांअपेयानांमद्या
दीनांचवर्जनम्।देवर्षिपितृतर्पणम्।साग्नेरनग्नेश्च।उत्तरयत्रपूर्वमासेपरमासेवच्छान्निमित्तस्य
तत्रकर्मनिमित्तस्यग्रहणादेर्नियतत्वात्।तन्तुमलमासेदर्शश्राद्धोक्तिरयुक्ता।संवत्सरातिरेकेण
मासोयःस्यात्मलिम्लुचस्तस्मिंस्त्रयोदशेश्राद्धंनकुर्यात्।हिमुसंक्षयेइतिऋष्यशृंगवाक्यविरोधात्।
मेवं।काम्यश्राद्धविषयत्वादस्य।संरवतिरवकाशेदर्शश्राद्धंतिथिविहितंवारविहितं।नदृष्टा

Indira Gandhi National Centre for the Arts

दीर्विहितं यथा स्वर्गमायुरित्यादि याज्ञवल्क्योक्तं वार विहितं यथा आरोग्यं चैव सौराथ्यमित्यादि
बृहस्पतिवचनोक्तं। नन्वत्र श्राद्धद्वयस्यैकस्मिन्दिने प्रतिषेधान्नतद्विषयोयं प्रतिषेधः। नैवं। याः
काम्यं श्राद्धं विदधातितस्य नश्राद्धद्वयानुष्ठानं। काम्यानुष्ठानेनैव नित्यश्राद्धापूर्वस्य सिद्धेः प्र
संगत्यायात्। तेन काम्यश्राद्धविषयता अयस्थंगवचनस्य। नित्यं नैमित्तिकं चैव
श्राद्धं कुर्यान्मलिम्लुचे। तिथिनक्षत्रवारोक्तं काम्यं नैव कदाचनेति। ननु मलमासाद्यमासे मृता
नां सांवत्सरिकश्राद्धं मासद्वयेपीत्येतन्नयुक्तं। मलमासे मृतानां तु यच्छ्राद्धं प्रतिव
त्सरं। मलमासेऽत तत्कार्यं नान्येषां तु कदाचनेति। तु शब्द एवार्थे। वर्षे वर्षे तु यच्छ्राद्धं
मृताहं तन्मलिम्लुचे। कुर्यात्तत्र प्रमीतानामन्येषामुत्तरत्र त्विति। ननु स्मृत्यन्तरवचनाद्दलयत्वप १५२

कीर्तिं मा दुर्गेन्द्रस्थापनोत्थाने ध्वजोत्थानं च वर्जिता। पूर्वं चेव प्रतिषिद्धानि परत्राप्यत्र दैविकां अध्या
यानामुपाकर्म उपक्रमः। सुप्ये बलिः अष्टका। ईशानबलिः। विष्णोः शयनपरिवर्त्तनौ उत्सर्जनं समा
प्तिः। ईशानादि देवानां पवित्रार्पणं दमनार्पणं वा हिमंतप्रवरोहेमंतप्रवरोहणमित्यर्थः। सर्पब
लिः अष्टकाः ईशानबलिः। विष्णोः शयनपरिवर्त्तनं। पार्श्वपरिवर्त्तनं। दुर्गायाः इंद्रस्य च स्थापनं। अ
कध्वजोत्थापनं। पूर्वमनित्यमनिमित्तं चेत्यादि वचनप्रतिषिद्धानि अद्य दैविकं च परत्र मासे कु
र्यात्। देवकार्याणि चोत्तरे। उपाकर्म तथोत्सर्गः काम्यमुत्सवमष्टकाः। मासद्व
येपराः कार्या वर्ज्ययित्वा तु पैतृकं। सर्वत्रैव कृष्णदशम्यादिदिनेष्वयोदर्शितः। रवौ मेषगते दर्शाद्
यं च मिथुने रवेः। आषाढस्य द्वितीयाद्वै आषाढो पि यथार्थतः। चैत्रमासे कृष्णपक्षे दशमी प्रभृति

Indira Gandhi National
Centre for the Arts

दिनेषु दर्शो द्वावेवीनेषु रवौ मेषगते सति मिथुने दर्शोद्वयं सवेत्।रवौ मिथुनस्थे सति दर्शद्वयं स
वेदित्यर्थः।तदा आषाढमासद्व्यं द्विराषाढ इति स वा षाढाषाढो यथार्थः स्यात्‌ इत्यापाषाढो ऽत्र चैवार्थो
पि द्विराषाढ इत्यर्थः॥ कृष्णपक्षे दशाद्या दौ यदा संक्रमते रविः। द्विराषाढः
स विज्ञेयो विष्णुः स्वपिति कर्कटे। मरीचिः॥ कृष्णपक्षे दशाद्यादौ मेषं गच्छे द्दिवाकरः॥ द्विराषाढः स वि
ज्ञेयो शेते कर्कटके च्युत इति। दशाद्या दौ नवम्यामित्यर्थः। नवम्या परतारगे मेषे संक्रमे दिनद्वय
द्दस्याद्येष्टकृष्णपक्षचतुर्दश्यापरसागे मिथुनसंक्रमः संपद्यते ततो दिनद्वय द्दस्यावास्य दर्शनमतिक्र
म्य कर्कटकः संपद्यते ततश्च मिथुनस्थे रवौ द्विराषाढः संपद्यत इत्यर्थः। विशाखाद्यर्थमासेषु पं
च स्वेकत्र मासि चेन्न द्वौ दर्शौ विकः संक्रान्तौ गौण्याषाढ एव तु। आषाढौ द्विरा वृत्तौ द्विराषाढ इति। २५८

अतोन्येषु वैशाखादिमासपञ्चकेषु एकत्र मासि एकसंक्रान्तौ द्वौ दर्शौ स्यातां चेत्‌। एषु मासेषु एकसं
क्रान्तौ दर्शद्वययुक्तो मासो गौणाषाढः स्यात्‌। एकसंक्रान्तौ दर्शद्वययोगलक्षणगुणयोगाच्छ्रो
ण इत्यर्थः। माधवाद्येषु षट्स्वेकमासि दर्शद्वयं यदा। द्विराषाढः स विज्ञेयः शेते कर्क
टके च्युतः। स चाधिमासो यं द्विराषाढो नाम नान्य इति। अधिमासफले दो यं द्विराषाढो पि
संमतः। योयमुक्तो द्विराषाढो नान्यः स्यादधिमासतः। संज्ञाभेदात्स एवोक्तो विशेषः
शयने हरेः। द्विराषाढ इत्युक्तेः किं प्रयोजनमित्यत्रोक्तं। विष्णोः प्रस्थापनायायं द्विराषाढ विधिः
स्मृतः॥ ग्रन्थान्तरे। द्विराषाढ विकल्पोयं वैकुण्ठशयनं प्रति। उत्थापनं च शङ्कस्य सिंह एवावतिष्ठ
ते। द्विराषाढविधेः कथं हरिशयनार्थत्वमित्यत्रोक्तं मासेषादिकृतये स्यादागामिन्यपि वक्ष्यराद

द्रूयवहरिस्वापः कर्कटादित्रिकेयदिकर्किस्थेवतथाहद्विमोसिंहस्थवशाङ्कदेवा अद्यापि।
सहितराषाढोमेषादिसंक्रांतिकेयदिस्यात्तदा आगामिन्यपिवत्सरेद्व द्रूयवमिथुनएवहरिस्वा
पोस्तवेत्। हितराषाढः कर्कटादिसंक्रांतित्रिकेयदिस्यात् तदा आगामिनिवर्षेकर्किस्थेवसंक्रांता
वेवहरिस्वापोस्तवेत्। कस्मात्तिथिहहिताररतथात्। अयंभावः यदा मेषस्थेरवौ हितराषाढः स्यात्।
तन्तुद्ववेशाषशुक्लपक्षेप्रतिपदिद्वितीयायांवा वृषसंक्रमे मिथुनादित्रयसंक्रमेषु प्रतिसंक्रमणं १५९
दिनद्वयवृद्धोनवदशावादिनान्यधिकानिस्युः पुनरागामिनिवर्षे वृषस्तमिथुनेदिनद्वयवृद्धोच
वारि दिनान्यधिकानिस्युः ततश्चाषाढशुक्लपक्षेत्रयोदशचतुर्दशावादिनानिरविर्मिथुनस्थोभ
वति। एवंचाषाढशुक्लद्वादश्यांहरिस्वापोरवौमीनस्थएवभवति। एवंमिथुनस्थेचयोज्यं। यदाक

र्कटस्थेरवौकर्कटस्थएवसत्तिभवति। एवंकन्यास्थेसिंहस्थेचरवौयोज्यम्। [illegible] मेषादि
मिथुनान्तेषु हितराषाढः स्यात्तदा शुक्लपक्षेप्रतिपदिद्वितीयायांवायदाकर्कटसंक्रमे सिंहादिसंक्रां
तिद्वयेप्रतिसंक्रमणं दिनद्वयवृद्धौत्रीणिचत्वारिवादिनान्यधिकानिस्युः पुनरागामिनिवर्षेद्विष
त्रमिथुनयोर्दिनद्वयवृद्धौनवदशवादिनान्यधिकानिस्युः ततश्चाषाढशुक्लपक्षेसप्तवादिनान्य
ष्टवारविर्मिथुनस्थोभवति। एवंचाषाढशुक्लद्वादश्यांहरिस्वापोरवौकर्कटस्थएवसतिभवा
ति। एवंकन्यास्थेचसिंहस्थेचरवौयोज्यम्। [illegible] मेषादिमिथुनान्तेषु यदा वर्षद्वयंभवेत्
अद्यापरेतदावृद्ध्यं मिथुनार्केहरिस्वपेत्। कर्कटादित्रयेचापि यदावर्षद्वयंभवेत्। अद्यापरेतदा
वश्यंकर्कटार्केहरिस्वपेत्॥ इत्यधिकमासे [illegible] र

विणासहस्तशुक्रस्य गुरोर्वात्यंतसंनिकर्षाद्दर्शनं तन्मौढ्यमित्यर्थः। रवि
णास्तमितयोर्बालग्रहाणामस्तत्वं च यते। तमोर्वार्धकं मौढ्यादिकं वार्धक्यं प्रकीर्तितं ततो मौढ्यादर्वा
गवस्था शुक्रबृहस्पत्योर्बालकं। मौढ्यादिमवस्थान्तरं वार्धक्यं प्रकीर्तितं।
अर्वागेवमवस्थाभ्यां मौढ्याद्यार्द्धिकं शैशवेति। पश्चात्प्राच्यादिशि वृद्धत्वं पश्चात्यं च दिनं कवेः शैशवं प्रा
क्पंचाहपश्चाद्दशादिनं स्मृतं। कवेः शुक्रस्य प्राच्यां दिशि वृद्धत्वं पक्षं स्मृतम्। पंचदश दिनानि वृद्धत्वं स्या १६०
दित्यर्थः। पश्चात्प्रतीच्यां दिशि पंचदिनं वृद्धत्वं स्मृतं शैशवं भावात्यं तत्प्राच्यां पंच दिनं स्मृतं। पश्चा
त्प्रतीच्यां दिशि दशदिनं शैशवं स्मृतं। पागुरुतः शिशुरहस्त्रतीयं शितःस्यात्पश्चा
द्धाहमपि पंचदिनानि वृद्धः। प्राच्यां तु पक्षममरेज्यगुरुः स्वपक्षे आगम्य पश्चगदितो

प्राग्बालो दिवसत्रयं दशदिनं पश्चात्स्थितो वृद्धतां पक्षे वा सरपंचकं समलसत्तेपश्चा
गुरुः सर्वतः। तत्पश्चाद्गुरुशुक्रयोर्विमलयोः कुर्याद्विवाहं स्थिते पक्षे वा सरपंचकं रश्मिवृद्धं न स्याद्
शाहः परः। प्राक्पश्चादुदितः शुक्रः पंचसप्तदिनं शिशुः। विपरीतं तु वृद्धत्वं तद्देवगुरो
रपीति। ननु श्रीपतिनारदामोदरीयवचनयोः प्राच्यां त्रिदिनमुक्तं बार्हस्पत्यवचनेन तु पश्चाद्बाल्यं
सप्तदिनमित्यक्रमात् तत्र कालभेदो देशविशेषविषयत्वेन परिहर्तव्यः। आपत्संकटादिवशेन य्या
स्यः। शुक्रो गुरुः प्राक्परा क्व बालो विंध्ये दशावंतिषु सप्तरात्रं। वंगेषु हीनेषु हूनेषु
षड्रशेषेषु देशे त्रिदिनं वदंतीति। अस्मिन्वाक्ये येधिककालाद्यभेदेशभेदेन य्यवस्थितावोद्ध्या।
अतो न विरोधः। बहवो दर्शिता कालाये वान्ये वाद्यैकेपि वा। शास्त्र बाधि

काः शेषादेशलेशाङ्गताय द्दीयानि कर्माणि मलिम्लुचे प्रतिषिद्धानि तानि वात्रापि वर्जनीयानि मि
लिम्लुचेति षिद्धानि कर्माणि अत्रापि वर्ज्जयेदिति मलिम्लुचातिदेशात् अनित्यमनिमित्तं चेत्यादिना
प्रतिषिद्धानि कर्माणि गुरुशुक्रमौढ्यवार्द्धकशैशवेष्वपि वर्जनीयानि। अग्न्याधानं प्रति
ष्ठां चेति अस्तगे च गुरावितिना मान्नप्राशनमिति वापीकूपेति गृहप्रवेशेति अनाद्यदेवतामिति
आधानयज्ञकर्मेति राजेति यदा खे मंडलमेति काद्यौ विनष्टतेजा गुरुरा १८१
प्यथैवं कालसदीक्षाव्रततीर्थयात्रा विवाहयज्ञोपनयनाश्रहेतुः प्रसंगतः खंडतिथिरपि निरूप्यते
यो दयादेति मध्याह्नमखंडा सा तिथिरन्यथा खंडान्यथा व्रतारंभसमाप्तिं चात्र वर्ज्जयेत्। या तिथि
रुदयादास्तमध्याह्नमेति उदयादास्तमध्याह्नपर्यन्तं वर्त्तत इति यावत् सा तिथिरखंडा

पराह्णव्यापिनी ।। खरखंड व्यापिमार्तण्डा न खरखंडा नैव तिथि ४ । व्रतप्रारंभ समाप्त्यमस्त गुरुशुक्र मु० कु० २

स्मृता। अन्यथा उदयादास्तमध्याह्नपर्यन्तं न वर्त्तते चेत्सा तिथिः खंडिता स्मृता। अत्र खंडिता तिथौ
व्रतानामारंभसमाप्तिं च वर्जयेत्। सा तिथिरनष्टगुरुशुक्रयुक्ता स्यात् तस्यां व्रतारंभणं कुर्यादित्य
र्थः। खरखंडा व्यापिमार्तण्डा ह्यखंडा वेत्सूर्योदयावधिस्तिथिः। सा ह्यखंडा व्रतानां स्यात् आरं
भसमापनं। उदयस्था तिथिर्या हि न भवेद्दिनमध्यभाक्। सा खंडा न व्रतानां स्या
दारंभसमापनमिति। ता
त्र मन्त्रः। सिंहकर्कटयोर्मध्ये सर्वा नद्यो रजस्वलाः। तासु स्नानं न कुर्वीत वर्ज्जयित्वा समुद्रगाः। य
दाह। सिंहकर्कटयोर्मध्ये सर्वा नद्यो रजस्वलाः। त्रिदिनं स्युर्महानद्यो गोदावेण्या च जाह्नवी। भागीर
थी च कालिंदी नद्यः शोणादिकाश्च ताः। कर्कटात्संक्रमादारभ्य सिंहसंक्रान्तिपर्यन्तं

सर्व्वाएवनद्योरजस्वलास्युः।शेषंसुबोधं।तत्राहस्म ... नरोनसद्ययोर्मध्येसर्व्वानद्योरजस्व
ला।।अप्रशस्तंततःस्नानंवर्षादौनववारिणि।मत्स्यपुराणेपि।यावद्वोदेतिभगवान्दक्षिणाशाविभू
षणम्।तावद्वजोवहानद्यःकरतोयांविवर्जिताः।करतोयामहानदीव्यतिरिक्तनद्यइत्यर्थः।
यद्वा।करतोयाअपवित्रनदीविशेषःप्रत्युदेशेप्रसिद्धास्युरित्यर्थः। सिंहकर्क्कटयो
र्म्मध्येसर्व्वानद्योरजस्वलाः।तासुस्नानंनकुर्व्वीतवर्जयित्वासमुद्रगाः।इति।समुद्रगामहानदी। १६२
वर्षादौसरितःसर्व्वाःस्रवन्तीहरजस्वलाः।तासुस्नानंनकुर्व्वीतवर्जयित्वाद्वगौतमीं।एवंसर्व्वत्रप्राप्तेव
पवादमाह।त्रिदिनंत्रमहानद्यइति।महानद्यस्त्रिदिनंत्रीणिदिनानिरजस्वलाःस्युः।
आदौकर्क्कटकेदेविमहानद्योरजस्वलाः।त्रिदिनंतुचतुर्थेह्निशुद्धाःस्युर्जाह्नवीयथा।

X का ३

महानद्योदेविकाचकावेरीवंजुलातथा।रजसानप्रदुष्टाःस्युकर्क्कटादौत्र्यहंत्र
पाएवंसर्व्वत्रमहानदीषुप्रशङ्कावपवादमाह।स्मर्त्तिं।चादित्यदुहितागंगाप्लक्षजातासरस्व
ती।रजसानैवलिप्यन्तेवेणीचनदसंज्ञकाः।। ... कालिन्दीगोमतीगंगावेणिकाचसर
स्वती।सामर्थ्यादार्षिजात्याश्वरजोनास्तिसर्वत्यमः।आर्षिजात्यंकुलीनत्वंदेवसंभूतत्वमितिया
वत्।तदाहस्मृतिसंग्रहकारः।तपनस्यसुतागंगागोतमीचसरस्वती।रजसानाभिलिप्यन्तेवेण
वनदसंज्ञिताइति। ... जाह्नव्यादित्यसंभूताप्लक्षजातासरस्वतीरजसानैवदुष्यन्तेनद
कृष्णाचवेणिका।आदित्यदुहितायमुनानचगंगायाश्चापिरजोदोषःप्रतीयते।चतुर्थेहनिशुद्धाः
स्युर्जाह्नवीयथेति।तविष्णुपुराणवचनादितिनवाच्यम्।श्राद्धिमात्रेहप्रतीयतेरजोदोषव

वे। गंगाधर्मनदी वेण्या यमुना च सरस्वती। अंतर्हिता रजोदोषाः सोरस्तेय्य इवा।
मलाः॥ तथा शोणनदिका नदाः तदुक्तं नर्मदा इत्या इति। नदानां पुरुषजातीय तया रजोदोषो
नास्ती तिराव॥ महानद्यश्च ब्रह्मपुराणोक्ताः॥ भागी रथी च कालिंदी नर्मदा च सरस्वती॥ विशो
का च विहस्ता च गोतमी कृष्णवेणिका॥ तुंगभद्रा च भीमरथी तापी श्वेतपयोष्णिका। द्वादशैता म
हानद्यः पापिनः पावयंतियाः। गोदावरी भीमरथी तुंगभद्रा च वेणिका। तापी पयो
ष्णी विंध्यस्य दक्षिणे परिकीर्तिताः॥ भागीरथी नर्मदा च यमुना च सरस्वती॥ विशोका च १८३
विहस्ता च विंध्यस्योत्तरतः स्थिताः॥ द्वादशैता महानद्यो देवर्षिक्षेत्रसंभवाः इति॥ अत्र च विशे
षोऽरतते प्रोक्तः॥ अपवित्रमपि ग्राह्यं गंगां यातिप्रवर्तितास्यं॥ पुण्यं तमासमा।

योगादुष्टमप्यदपावनम्॥ किंच। विशेषांतरमाह। कालेनं वमस्तुष्टं कं प्रत्ययम स्तु विप्रस्य
अकाले तु दशाहं तत्पीत्वा नर्घादहर्निशम्॥ महदं तु समेवात्र यदि विद्यात्
गातनम्॥ नवांबु मिश्रिते तेन न दुष्टमिति स्मरयः आङ्क रिति शेषः। विशेषांतरमाह। ग्रहणे
मरणे चोपाकर्मण्युत्सर्गकर्मणि। आजीवने चाप्यगतो रजोदोषो न विद्यते। चंद्रसूर्यग्रहणा
दिनिमित्तस्नानादिकर्मणि रजोदोषो नादीस्तु नास्तीत्यर्थः उपाकर्मणि चोत्सर्गे
प्रेतस्नाने तथैव च। चंद्रसूर्यग्रहे चैव रजोदोषो न विद्यते। अगतो गत्यंतराभावे आजीवने र
जोदोषो नास्तीत्यर्थः। आजीवनं ग्रामोपसोगः॥ अत्रापि क्रमवापीनामनपा
यिपयो भूतं। रजो दुष्टेपि पयस्त्रियामतो गो न दुष्यति। आपगानां रजोदोषो इति सत्यं विनिश्च

Indira Gandhi National
Centre for the Arts

य॥ अधुना तैलाभ्यंगादिनिमित्ते कालनिर्णय उच्यते।
भूतषष्ठ्यष्टमी रिक्ता पूर्णिमा संक्रमेषु च। द्वादशी प्रतिपच्चैव सप्तमी पंच पर्वसु॥ द्वादश्यां उद
ती। विप्रस्तैलाभ्यंगं विवर्जयेत्॥ भूतं चतुर्दशी॥ रिक्ताः चतुर्थी नवमी चतुर्दश्यः। पूर्णिमा पूर्णमासी॥
अमा अमावास्या॥ संक्रमा रविसंक्रान्तयः एतत्संज्ञासु उक्तस्नानादिकालादन्यत्रेत्यर्थः। रंध्रं नवमी॥
भूतादिषु तैलाभ्यंगं वर्जयेदित्यर्थः। कुहूपूर्णेन्दुसंक्रान्तिचतुर्दश्यष्टमीषु च। १६४
नरश्चाण्डालयोनिः स्यात्तैलस्त्रीमांससेवनात्॥ कुहूरमावास्या॥ पूर्णेन्दुः पूर्णमासी॥ मोह
त्यतिपदं षष्ठी कुहू रिक्ता तिथौ तथा। तैलेनाभ्यंजयेद्यस्तु चतुर्भिः परिहीयते॥ व्यासः। पंचदश्यां च
तुर्दश्यामष्टम्यां रविसंक्रमे। द्वादश्यां सप्तमीषष्ठ्योस्तैलाभ्यंगं परित्यजेत्॥ सप्तम्यां नस्पृ

शेत्तैलं नवम्यां प्रतिपद्यपि। दर्शे च पौर्णमास्यां च पंचस्वपि च पर्वसु॥ एकादश्युपवासव्रती द्वादश्यां
तैलाभ्यंगं वर्जयेत्॥ कांस्यं शाकं सुरा क्षौद्रं तथा वितथभाषणम्। व्यायामं च प्रवा
सं च दिवास्वापं व्रती त्यजेत्॥ शिलापिष्टं मसूरं च दशम्यादिषु वर्जयेत्॥ नन्वष्टमी पूर्णिमा संक्रमादि
ष्टेः पर्वसु तैलनिषेधे सिद्धे पुनः पंचपर्वग्रहणमनर्थकमेवं। अत्र वारयोगनिमित्ताभ्यंगनि
षेधार्थं पुनः पर्वग्रहणमिति नानर्थकं। न च तत्कुर्यात्तृतीयायां त्रयोदश्यां तिथावपि। शाश्वती
भूतिमन्विच्छन्दशम्यामपि पंडित इति। एतास्वपि तिथिषु तैलाभ्यंगनिषेधः प्रतीयते इत्यत्राह त्र
योदश्यां तृतीयायां दशम्यां कृत्तिकादयः। तृषो वर्णाश्च वर्ज्येषु स्नाने तैलोपकल्पितम्॥
त्रयोदश्यां तृतीयायां दशम्यां चैव सर्वदा। शुद्धविष्टकृत्तिया स्नानं न कुर्यात्तैलकल्पितं स

वेदेति वचनाद्दुतादच्छायामेव तावच्छायामपि क्षियादीनां तैलास्पर्शनिषेधः तथा दशमी
पुत्रनाशाय वित्तहा चैव त्रयोदशी॥ तृतीया लक्ष्मनाशाय तिस्रस्ताः परिवर्जयेद्व्रती॥
त्रयोदश्यां तृतीयायां प्रतिपद्दशमीदिने॥ द्वये तैलास्पर्शं न कुर्वीत पिबेद्वा दशमीं विना॥ तत्रापि
दंतत्रयोदश्यादिनिषेधः स्त्रियादिविषयः एवमन्यवाक्ये ष्वपुत्रे यथा तथा पंचपर्वसु नष्टसुव्रत
हे हरिवासरे एकादश्यां व्यतीपात दिवसे श्राद्धयज्ञयोः रंध्रे क्षिते सुखे दुःखे विवाहे जन्मवासरे १६५
सत्नेरिप्राविते पत्नी न कुर्याद्दंतधावनमिति नंदा प्रतिपत्षष्ठ्येकादश्यः व्रताहे व्रतदिने हरि
वासरे एकादश्यां श्राद्धदिवसे यज्ञदिवसे वा रंध्रे नवम्यां पुत्रस्वर्णादि रत्नालाभादिनिमित्ते सुखे
वक्षिते वर्जमाने आत्मजन्मनि दिने सत्ने रिप्रोषिते देशान्तरगते पंचपर्वादिषु तिथिषु जन्म

दिनपर्यंतासु सुखे दुःखे च क्षिते विवाहे च स्त्री दंतधावनं न कुर्यात्॥ प्रतिपत्पर्वष
ष्ठीषु नवम्यां हरिवासरे दंतानां काष्ठसंयोगो दहत्यासप्तमं कुलं॥ हरिवासरे द्वादश्यां॥
अष्टम्यां च चतुर्दश्यां पंचदश्यां हरा हनि तैलं मांसं व्यवायं च दंतकाष्ठं च वर्जयेत्॥ हरा
हन्येकादश्यां॥ व्यवायो मैथुनम्॥ श्राद्धाहे जन्मदिवसे विवाहे सुखदुःखयोः व्रते चै
वोपवासे च वर्जयेद्दंतधावनं॥ पंचपर्वसु नंदासु व्यतीपाते च संक्रमे॥ स्त्रियं तैलं च मांसं च
दंतकाष्ठं च वर्जयेत्॥ गते देशान्तरे पत्यौ गंधमाल्यांजनादि च दंतकाष्ठं च तांबूलं व
र्जयेद्वनिता सती॥ पंचपर्वे दशाष्ट्यादि तिथि दिनेषु व्रताह नि व्यतीपाते कृते श्राद्धे स्त्रीसंभोगं विव
र्जयेत्॥ विधुक्षयेन गच्छेत् प्रातः कालामपि स्त्रियं तैलं न संस्पृशेदादर्शं द्वन्द्वं

Indira Gandhi National
Centre for the Arts

व

ह्वेदयेन्नत्र। कुहूपूर्णेद्विति। एकादश्यां द्वादश्यां पंचपर्वसु श्राद्धीयाहे च
ताहे च स्त्रियं तैलं च वर्जयेत्। पंचपर्वसु पाते च दशम्यादिदिनत्रये व्रतस्थश्चाग्निश्राद्धस्थः पिशितं
नैव सस्पर्शयेत्। श्राद्धीयाहे दशम्यां च द्वादश्यां व्रतवासरे। एकादश्यां व्यतीपाते तैलं मांसं
च वर्जयेत्। षष्ठ्यां पर्वसु पक्षादौ रिक्तसंक्रांतितिथिष्वपि पाते श्राद्धव्रताहे च क्षौरं वर्ज्यं नित्यशस्तु
पर्वसु पंचपर्वसु। व्यतीपाते श्राद्धाहे नित्यशस्तु क्षौरं वर्जयेत्। षष्ठ्यमापूर्णिमापात १६६
श्चतुर्दश्यष्टमी तथा। आस्तु संनिहितं पापं तैले मांसे क्षुरे स्त्रिया। इति गर्गः। अन्यार रविवारेषु रात्रौ
पाते व्रताहनि। श्राद्धाहे प्रतिपद्रिक्ता रुद्राः क्षौरं विवर्जयेत्। नवमी सप्तमी दर्शसंक्रांतिग्रहणेषु
धात्रीफलस्य कल्केन प्रातःस्नानं न वासरेत्। श्रीकामः सर्वदा स्नानं कुर्वीतामलके

ति ३

नरैः। सप्तमी नवमी दर्शं सर्वकालं विवर्जयेत्। अमायां चैव सप्तम्यां संक्रान्त्यां रवौ दिनादिंदु
योपरागे च स्नानमामलकैस्त्यजेत्। पंचपर्वस्वरूपं चोक्तं। चतुर्दश्यष्टमी पक्षद्वये दर्शश्च पूर्णिमा।
संक्रान्तिश्चैते(?)पर्वाणि पंच प्रा(?)कुर्मेनीषिणः। शुक्लकृष्णपक्षयोश्चतुर्दशी अष्टमी। दर्शपूर्णिमा संक्रा
न्तिश्चैते पर्वाणि महर्षयः प्राहुः। पक्षद्वये हे अष्टम्यौ द्वे चतुर्दश्याविति सप्तपर्वाणि स्युरिति पंचत्वं तु
अष्टमीत्वेन चतुर्दशीत्वेन रूपेण व्याख्यानादिति। वारेषु पृथुलफलेषु संगादिकार्यो ह्युपु
स्तफलेषु तत्कुर्यात्। तथा स्मृत्यंतरे। संतापः कान्तिरल्पायुर्धनमारोग्यमेव च। दारिद्र्यं सर्वका
मांश्च लभते स्नाप्तकरादिषु। संतापः कान्तिमरणे धनमारोग्यमेव च। दारिद्र्यं स
र्वकामाप्तिं लभते तैलाभ्यंगकरादिषु। इदं च शिष्टाः। सूर्यादिमंदान्तदिनेषु रात्रिं तैलोपसेवा गाकुमा

त्राःफलानि। किंचायंविशेषःयत्तैलाभ्यंगार्थोनिषिद्धास्तिथिषुविहितवारयोगेतैलादिस्नानं कार्यं। अनिषिद्धतिथिषुअशुभवारयोगेनकार्यमिति। तिथिवारसमायोगेबलीयात्वा रथिष्यते। तिथिरेकगुणाप्रोक्तानक्षत्रंचचतुर्गुणं। करणंषड्गुणंचैववारश्चाष्टगु णाःस्मृतः। किंच। पक्वतैलंगंधतैलंसार्षपंपुष्पवासितं। वर्ज्योहेष्वप्यदुष्टंतद्व्यान्नरयुतंतथा। सार्षपंगंधतैलंचयत्तैलंपुष्पवासितं। द्रव्यान्तरयुतंतैलंनदोषायकदाचन। १६७

।तदाहयाज्ञवल्क्यः।

षोडशर्तुनिशाःस्त्रीणांतस्मिन्युग्मासुसंविशेत्। ब्रह्मचार्येवपर्वाण्याद्याश्चतस्रश्चवर्जयेत्। एवंगच्छ षोडशर्तुनिशाः स्त्रीणां ... चतुर्थ्यांजायतेपुत्रोह्यल्पायुर्दनवर्जितः। हीनावार धिकामांमघांमूलंचवर्जयेत्।

गौ

हीनावारयपि श्रेष्ठावर्णसंकरकारकः। पंचम्यामप्रमानारीषष्ठ्यांपुत्रस्तुमध्यमः। सप्तम्यांविध वानारीअष्टम्यामीश्वरःसुतः। नवम्यांसुभगानारीदशम्यांप्रवरेश्वरः। एकादश्यांपुत्रवती द्वादश्यां तुधनेश्वरः। वक्तुप्रजात्रयोदश्यांचतुर्दश्यांप्रजापतिः। पंचदश्यांमहाभागाषोडश्यांतुकुलेश्वरः। तृतीयेवा

चतुर्थेवामासिपुंसवनसंज्ञकंकर्मकार्यंतदुक्तं। तृतीयेवाचतुर्थेवामासिपुंसवनंस्मृतं। सीमंतोन्न यनंचचतुर्थेमासिषष्ठेष्टमेवाकार्यं। सीमंतोन्नयनंचतुर्थेमासिषष्ठेष्टमेपिवा। जन्मनोन्त रंजातकर्महोमसमन्वितमिति। जन्मानंतरंजातकर्मकार्यंहोमसमन्वितमिति। स्वशाखोक्तं मकर्मसमन्वितं। ब्राह्मणाहिजातमुक्तमृतकान्तेनामकरणंस्त्ववेलावचतुर्थेमासिनिष्क्रमाख्यंकर्म

Indira Gandhi National Centre for the Arts

कार्यं।षष्ठेमास्यन्नप्राशनम्।तृतीयेवर्षेप्रथमेवाचूडाकरणाख्यंकर्मकार्यं।दैवाद्यत्ररितंतु
पंचमेकार्यम्॥सिंहधन्वमीनेषुचूडाकरणंनकुर्यात्।उक्तकालेपिसिंहादिराशित्रयस्थितेसूर्ये
नकुर्यात्॥ सिंहेधनुषिमीनेचस्थितेसवितरिस्फुटं।क्षौरमन्नंनकुर्वीतविवाहंगृहकर्म
चेति।वचनात्॥ गर्भाधानमृतौपुंसःसवनंस्पंदनात्पुरा।षष्ठेष्टमेवासीमंतोमाष्टे
तेजातकर्मचा।अन्नंअन्नप्राशनं।अहन्येकादशेनामचतुर्थेमासिनिःक्रमः।षष्ठेन्नप्राशनंमासि १६८
चूडाकार्यायथाकुलमिति।शिवस्वाम्यपि।तृतीयेवाचतुर्थेवामासिपुंसःतिरिष्यते।चतुर्थेषष्ठे
ष्टमेवापिसीमंतोन्नयनंस्मृतम्॥ आद्येद्वितीयेतृतीयेवाविप्रश्चौलंप्रकल्पयेत्।द्वितीयात्
ब्राह्मणायेचपंचमेपिनदुष्यति।तृतीयेवापंचमेवाचूडाराज्ञांविशामपि।निगदव्याख्यामेतत्॥

दयः।मार्तेःसुधौतवस्त्रैश्चश्मसानस्थसमीपगैः।अज्ञातिविहितैर्द्रव्यैर्यथाशक्त्यासमाहितैः।मृ
ण्मयेषुचपात्रेषुकुंभेषुरुचकेषुच।सुपक्वैर्लड्डुकापूपैःपायसैःपानकैस्तथा।फलैर्मूलैर्वनोत्थै
श्चपूज्याःक्रव्याददेवताः।केचिद्दर्घ्यंप्रदातव्यंकेचित्सुपुष्पंचशोभनम्।धूपोदीपस्तथामाल्यंके
श्चिद्देयंचराचितैः।तत्रपात्राणिपूर्णानिश्मशानाग्नेविधारयेत्।किंचिद्देयानिसर्वाणिपानीया
च्युतानिचानिवेदयेतिवक्ष्यंतेःमंत्रैरनहंकृतैः।नमःक्रव्यादमुख्येभ्योदेवेभ्यइतिसंवेदाये
स्मिन्श्मशानेदेवाःस्युर्भगवंतःसनातनाः।तेस्मत्सकाशाद्गृह्णंतुबलिमष्टांगमक्षयम्।प्रेतस्यास्य
शुभान्लोकान्प्रयच्छंतुपिशाश्वताम्।अस्माकमायुरारोग्यंसुखंचददतामुखं।एवंकृत्वाबलीन्स
र्वान्क्षीरेणाप्युत्प्लावयेत्।विसर्जनंचदेवानांकर्तव्यंचसमाहितैः।ततोयज्ञियवृक्षोत्थांशाखा

Indira Gandhi National Centre for the Arts

मादाय वाग्यतः। अथ सर्वांकमाह ब्रह्मचारी कश्चित्समावर्तनाद्यवितथाद्गीतिरुद्गातिअथानाङ्गोऽङ्ग
वाग्निवापं वगम्येन समाप्य होमयज्ञे वेष्टूवा प्रक्षिप्य मध्ये राणेन वैमाह्ना दने सूते। अरण्ये
दग्मूले वा शुद्धे संस्थाप्य तत्र यथा तत्स्थाने शिनकेशी वा कदाचिज्जाह्नवीजले कश्चित्क्षिपति मत्य
तो दौहित्रो वा समाहितः। एही वा स्त्री नितङ्गस्म नीत्वा तोये विभिः क्षिपेत्। ततः संमार्जनं धर्मे कर्त
ध्यं गोमयां बुलिः। इत्यादि वपुष्प धूपादीर्बलिभिः पूर्ववत्क्रमात्। भूमेराच्छादनार्थं तु दूर्वापुष्करको २३९
थवा पदकोवा प्रकर्तव्यः तत्र सर्वैश्च वंधुभिः। ततः सर्वेलंस्नानं तु कर्तव्यं ते विधानतः। अष्टौ का
ङ्गानि। सस्यतोऽथ पायसपानकमेकमंगं फलमूले द्वितीयं। अर्घस्तृतीयं। अनुक्तो पि गंधः मा
ल्यं वर्यां चतुर्थमंगं। पुष्पमाल्यं च पंचमं। धूपः षष्ठं दीपः सप्तमं। यवधान्यादि पूर्णपात्राण्यष्टमं।

अन्यान्यप्यंगानि नमः क्रव्यादमुखेभ्यस्त्वनेनस्थेयानि। ये स्मिन्श्मशान इत्यादि दद्तां वरमित्य
नेन बलिदानम्। ततः क्षीरास्फसणपूर्वकं क्रव्यादमुख्यादे वा। ब्रह्मानंग ब्रह्मते स्थानम इतिविस
र्जनम्। प्रथमं शिरोऽस्थीनि ततो हृदयाद्यस्थीनि। क्षौमं। अतसीसूत्रनिर्मितं। पुष्करो देवकालादिः।
पट्टकः पटे हर इति प्रसिद्धः। तथा। महाशौचे द्वितीये ह्नि कर्तव्यमस्थि विसंचयः। सद्यः शौचे तत्क्षणं तु
कर्तव्यमिति निश्चयः। तत्र देवलः। अवाह। मुनिहर्त्रेषु सुस्नाताः कृत
मंगलाः। आयुष्याद्धिप्रमुपत्रेभा जगामस्वस्तिवाच्य च। यथाय यत्र वर्णेष्य यस्मात्
ग्रिमंवद। तत्र वस्त्र विशुद्धिं च गृहशुद्धिं च कारयेत्। समाप्य दशमं पिंडं यथाशास्त्रमुदाहृतं। ग्राम
द्बहिस्ततो गत्वा तेन शुद्धेन वाससी। अस्मानामा शितानां वत्यक्त्वा स्नानं करोति च। अश्मकल्पमनसा

सर्वयज्ञाद्यंतकृद्दातिथ्यायपि।गोरसर्षपकल्केनतिलतैलेनसंयुता।शिरःस्नानंततःकृत्वातो।
येनात्रस्थवाप्यतः।वासोयुगंनवंशुक्लमव्रणांशुद्धमेवच।अष्टदीपागांसुवर्णंचमंगलानिस्पृशनित्वा।
स्पृष्ट्वासंकीर्त्तयित्वाथपश्याद्बुद्धोभवेन्नरः।पश्चिममशौचात्तस्म।गृहशुद्धिर्लेपनंसर्वेराणादित्या
गमः। शोधूतोग्निमुपसमाधायतंत्रोक्तेनविधिनाशास्तुदकंकुर्यात्। द्विपस्तु
श्वत्यपःस्पृष्ट्वाकृतिपोवाहनायुधंवैश्यःप्रतोदंरश्मीवायष्टिंशूद्रःकृतक्रियः। अशौचा
वच्छितीक्षिशय्यांदद्याद्विचक्षणः।कांचनंपुरुषंतद्वत्फलवस्त्रसमन्वितम्।हर्षोत्सर्गंचकुर्वीत २४०
देयाश्चकपिलाशुभा॥ ॥बालबोद्धकुलकैरवचंद्रद्रोणिपालजटमल्लविलासे।श्रीधरस्थकृ
तिनःकृतिरेषासंततंकृतिमुदेस्तमुदेत्।

फे२

।तत्रादौरजतादिद्रव्य
शुद्धिः॥तत्रयाज्ञवल्क्यः।सौवर्णरजताब्जानामूर्द्धपात्रग्रहाश्मनाम्॥शाकरज्जुमूलफलवासोविद
लचर्म्मणाम्॥पात्राणांचमसानांचवारिणाशुद्धिरिष्यते।सौवर्णंसुवर्णविकारःराजतंरजतवि
कारः।अब्जंशंखशुक्तिमुक्ताफलादि।ऊर्द्धपात्रंयज्ञियोलूखलादि।ग्रहाःसोमग्रहाःषोडशिग्रहस्तथ
अश्माहषदादिः।मूलमार्द्रकादिविदलंवेणुदलादि।विदलग्रहणंतद्विकाराणां।छत्रादीनामु
पलक्षणार्थम्।चर्म्मोनादीनांतद्वत्तद्विकाराणांचरत्रादीनामुपलक्षणार्थं।पात्राणिप्रोक्षणीपात्रा
दीनिस्नेहरहितानि।चमसाहोतृचमसादयः।एतेषांलेपरहितानांमूत्रोच्छिष्टादिस्पर्शमात्रेवारिणा
शुद्धिः।प्रक्षालनाच्छुद्धिः। चमसस्रुक्स्रुवसेहपात्राणांशुल्बेनवारिणा।चरुःचरुस्थाली।शु

Indira Gandhi National Centre for the Arts

शावर्णादीनां लेपसहितानामेव पूर्वोक्तशुद्धिः। तथा च मनुः। निर्लेपं कांचनं भांडमद्भिरेव विशुध्यति २

मयी। शुक्रकुंभ्राद्यादिः। सुवर्ण्स सिद्धः। मिह्पात्राणि प्राशित्रहरणादीनि लेपरहितानि चम्रोदी
नि उष्णेन वारिणा शुद्ध्यंति। अश्मसर्वमयं चैव राजतं चानुपस्कृतम्। अनुपस्कृतं विचलेखादिरूपा
विकाररहितं। उपात्रत्तियन्नवेष्टनवाक्याथ्या दोरेषितिवेष्टतां थेसुदो विधाना ध्रुरेखादिसा
हित्येनाधिकमलसंबंधाज्ञापयावशुद्धिः। भृङ्गोच्छिष्टेतर विषया। तत्रशंखेन शुद्धेतरकथनात्।

तैजसानां मणीनां च सर्वस्याश्ममयस्य च। भस्मनाद्भिर्मृदा चैव शुद्धिरुक्ता मनीषिभिः। क २४१
कमुखदूषितस्याशुद्धांतरमाह। कुब्जशकुनिमुखावसृष्टं निर्लेखेन। श्वापदमुखावसृष्टंपा
त्रंनसगृह्णीत। निर्लेखनं अस्त्रेरुपरितनावयवानामपकर्षणम्। तत्क्षणमितियावत्। यथा पक्षी
वेनोक्तम्। गवाघ्रातानि कांस्यानि शूद्रोच्छिष्टानि यानि च। शुध्यंति दशभिः क्षारैः श्वकाकोपह

क २

तानिचेति। तत्स्वल्पोपघातविषयम्। अत्र च क्षारो भस्म। एवं चानाधिकशौचकल्पाः स्वल्पाधिक्यो
पघातविषयत्वेन व्यवस्थिता वेदितव्याः। उष्णेन वारिणा शुद्ध्यंतीत्यत्र हरितः। स्फ्यसूर्प्पा
जिनधान्यानां मुशलोलूखलानसां मसा। स्फ्यः काष्ठखड्गो यज्ञांगभूतः। अनः शकटं। अत्र पुनरपि
लिनग्रहणं यज्ञांगाजिनप्राप्त्यर्थम्। एतेषामुष्णेन वारिणा वक्ष्यमाणमृदादिवर्ज्यतमसहितेनमस्य
संसर्गेत्तु परिलेखकं स्पर्शमात्रोपघाते। विःस्तरकंबोलस्मनापरिमार्जनमतैजसानामेवं भूतानामु
सर्गमिति। अग्निसंयोगेन द्रवीकरणमावर्त्तनम्। भस्मनापरिमार्जनं कांस्यस्य नियतम्। यच्च याज्ञ
वल्क्येन सौवर्णरजताब्जानामित्युपक्रम्य वारिणा शुद्धिरिष्यत इति केवलोदकमेवोपात्तं तद
पि मृदादिसहितमेव। शुद्धिहेतुरितिज्ञेयम्। विशेषमाह हारीतः। अद्भिः कांचनरजतशंखशुक्ति।

Indira Gandhi National Centre for the Arts

नांतद्रुमावर्जनं भस्मेद्वैवेत्योपहतानां यवगोधूमकलायमाषमसूरमुद्गयवकुलत्थादीनां च ॥ अ
लवणानां तामाणां क्षमनाकाष्ठानां प्रक्षालनैस्भिकतानां घर्षणैः काष्ठमयानां मृ शिला
घर्षणमार्जनैर्मणिमयानामिति ॥ आगतोलोहितेष्य साधनमाक्त सुणातकरनमात जङ्गं धावकर्षणे ।
मेदेवैवध्योपहताः उच्छिष्टादिभिरेभिर्विवर्णयेथासवमिनथो उपहता इत्यर्थेऽथयवादिद्रव्याणांना
मेककार्यकारित्वाद्विकल्पः । उदकश्च सर्वत्र शोधन इत्यर्थैः सहसमुच्चयः । सूतिको २४२
च्छिष्टस्यामस्पृष्टसुरामद्यहतस्य वा । त्रिभमार्जनात्तु शुद्धिर्भस्मकांस्यतापनास्तुतिकोच्छिष्टादिसि
कांस्यशतिरिक्ततैजसानामल्पकालोपघातेयवदृष्टणादिलिमार्जनं शुद्धिहेतुः । कांस्य स्यतथान
अपितुतापनं मार्जनमपिशुद्धिसाधनमित्यर्थः । प्रतिमार्जनमुदकप्रक्षालनमावर्त्तनादि

त्रातिमुक्तोच्छिष्टसंस्पर्शे विशेषमाह स एव । उक्तस्यत्रदिशांदेवसहस्रमार्जनान्नशुचिः । वशुद्धर्थमुद्
यदुक्तं वत्रशिवमार्जनमात्रमेवोपक्षिप्यरञ्जीयादृशोपस्पल्पयज्ञतः । गोशृंगेणात्र संस्पृष्टं
त्यादंशुचितामियात् ॥ गवाघ्रातानि कांस्यानि शूद्रोच्छिष्टानि यानि च । मणिमुस्काघवला
नांशुच्छिश्वप्रक्षालनेन तु । एतस्योपघातविषयमन्नुष्ट्रास्थानामल्पोपहतौ । पुनः
पाकान्महीमयमिति । मद्यात्तुपघाते त्यागएव । मद्यैर्मूत्रपुरीषैर्वा ष्ठीवनैः पूय
शोणितैः । संस्पृष्टं नैव शुद्ध्येत पुनः पाकेन मृण्मयं ॥ स्मृत्यन्तरे । तस्मान्नाशुद्ध्यते कांस्यं सुरया चेन्न
लिप्यते । सुरामूत्रपुरीषैश्च शुद्ध्यते तापलेपनैः । सुरादिग्रहणं शुक्रशोणितादीनामुपलक्षणं ।
ताम्रमक्षेन शुद्धेत्तु नवेदामिषलेपनमात्रामिषेन तु यत्किंचित्तन दीहेन शुद्ध्यति ।

Indira Gandhi National
Centre for the Arts

५ त्रिधा ३

सुवर्णरूप्यशंखाश्मशुक्तिरत्नमयानि चाकांस्यायस्ताम्ररैत्यानि त्रपुसीसमयानि च ॥ निर्
लेपनानि शुध्यंति केवलेन जलेन च ॥ शूद्रोच्छिष्टानि शोध्यानि त्रिधा साराम्लवारिभिः ॥ अत्र उच्छि
ष्टैर्वा त्रिमार्जनम् ॥ न तु त्रिमार्जनम् ॥ आतातपेन स्पर्शा श्वे वा मार्जनविधानात् ॥ गवाघ्रातेषु कां
स्येषु शूद्रोच्छिष्टेषु वा भस्मना दशभिः शुद्धिः श्वकाकोपहतेषु च ॥ एतत्र तु मलिः गोधनेष्व
काकाद्युपहतामत्ररात्रमन्नानामत्र रंहतिकाद्याव विण्मूत्ररजस्वलाहतानि चाप्रक्षेप्यानि २५३
तान्यग्नौ यद्यावत्स्नेहदर्पिष्यद्धं यावदग्निप्रक्षेपं सहेत यावता मिप्रक्षेपेन न नश्यति
तावत्कुर्यादित्यर्थः ॥ तैजसानां मूत्राद्युपघाते पुनःकरणम् ॥ गोमूत्रे वा सप्तरात्रे
णपरिवासनम् ॥ लेपनं निर्हरणाशक्तौ पुनर्निक्षिप्य पुनराकरमादिशेत् ॥ पुनराकरं पुनः

करणम् ॥ लोहानां दहनाच्छुद्धिः भस्मना गोमयेन वा ॥ दहनाद्दहनाद्यपि शैलानामं
सापिवा काष्ठानां तक्षणाच्छुद्धिः मृण्मयजलैरपि ॥ तक्षणं दारुश्रृंगास्थ्नां गोपालै
फलसंभवानां मार्जनं यज्ञपात्राणां पाणिना यज्ञकर्मणि ॥ उच्छिष्टमेध्यादिलिप्तानामेतेषां मृद्
दकादिभिर्निर्लेपान पश्यमेतक्षणं लेपयुक्तावयवापनयने शुद्धिः ॥ फलसंभवानां नारिकेरादिफल
संभूतानां प्रक्षालनेनापगतलेपानां गोवालैरवघर्षणेन शुद्धिः ॥ यज्ञपात्राणां स्रुगादीनां प्रक्षाल
नादि दिक्तशोधा मांदर्भैः पवित्रेण वा कर्माङ्गत्व सिद्ध्यर्थं हस्तेन मार्जनं कर्तव्यं शातनाय
ज्ञकर्मणि विनियोजनीयानीत्यर्थः ॥ संहतानां तु पात्राणां यद्येकमुपहन्यते तत
स्तेव शोधनं प्रोक्तं न तत्स्पृष्टिनामपि ॥ मलसंयोगजं तत्र यस्य यैर्नोपहन्यते तद्यत

Indira Gandhi National
Centre for the Arts

ह्येवं तयोरन्तं मामाद्यद्व्यस्य द्विकं च। यथास्रोष्ठद्व्यस्योर्ध्वेष्टादिसंयोगजं। तत्कंबलावजी
वामलंयेन रसादिनोदकसहितेनोपहन्यतेतस्य तद्बोधकं रवतीत्यर्थः॥
तत्र यमः। यदि मूत्रपुरीषासृग्रेतसा कृमिरेण वा। चैलं समु
पहन्येत स्य शुद्धिः प्रक्षालयेत्तु तत्रायदं रमानस्य द्योतु वस्त्रं चोपहतं हृदयं। छेदनं तस्य दाहो वाय
न्मात्रमुपहन्यते। वस्त्रं मृदं रसाशुद्धेन रज्जुवैदलमेव च। रज्ज्वादिकं वा तिष्ठस्तं त्याज्यं २४४
तन्मात्रमेव च। वेणुवेत्रनलादिविकारो वैदलम्। सूर्पोक्षि। यदा तु बहूनि धान्यवासः प्रभृती
निराशीकृतानि चाण्डालादिभिः स्पृष्टानि तत्रापि स्पृष्टान्यल्पानि अस्पृष्टानि स्पृष्टापेक्षया
धिकानि तदा स्पृष्टमात्रमुद्धृत्य तच्छोक्षप्रक्षालनादिभिः शुद्धिः कार्या। अवशिष्टस्य प्रोक्ष

शौचैर्णाद्यु द्धिः॥ अनेनैवाभिप्रायेण याज्ञवल्क्यः। प्रोक्षणं संहतानां च बहूनां धान्यवाससां।
वस्त्रधान्यादिराशीनामेकदेशस्य दूषणे। तावन्मात्रं समुद्धृत्य शेषं प्रोक्षणम
र्हति। अत्र शेषस्य प्रोक्षणविधानाद्दुष्टस्य प्रक्षालनादिभिः शुद्धिरिति गम्यते। यदा तु बहूनि
राशीकृतानि सर्वाण्यपि स्पृष्टानि तदा प्रोक्षणादेव शुद्धिः। यदा पुनः स्पृष्टानि बहूनि अस्पृष्टा
निचाल्पानि तदा सर्वेषामपि प्रक्षालनमेव। अद्भिः प्रोक्षणं शौचं बहूनां धान्य
वाससाम्। प्रक्षालनेन त्वल्पानां शुद्धिः शौचं विधीयते। राशिगतवस्त्रं चैव पुरुषायासेनाराद्
वेष्टितव्यम्। अनेको द्वार्ये दारुशिलेभूमिसमे इति बौधायनेनानेको द्वार्यस्येव द्वाद्य
स्य चाल्पशौचं दर्शनाम्। मेधे रुदकगोमूत्रैः शुध्यत्याविककौशिकं सर्वं

Indira Gandhi National
Centre for the Arts

फलैरंशुपट्टे सारिष्टैः कुतपं तथा। सगौरसर्षपैः क्षौममिति। जयेन परस्त्रत्रिकाविशेषः।
तत्संहितेनोदकेन गोमूत्रेण वा विकङ्कोशिकं शुद्ध्यति। जाणमयमाविकं। कोशेय रवतस
रीयहादितङ्गवं कोशिकम्। वल्कलतन्तुकृतमंशुः पट्टं। श्रीफलं बिल्वफलं। नेपालदेशी
यः छागलोमकृतः कंबलविशेषः कुतपः। अरिष्टकं फेणिलकं। अतसीसूत्रनिर्मितं क्षौमं।
एतच्चाधिकोपघाते। अल्पोपघाते तु प्रोक्षणमेव। भूयस्या विनाशेनैव शुद्धिः। यत्तु देवरिष्टवादिनाए २४५
तेषां क्षालनं नाम महत्त्वात्। अत एव देवलः। जाणकौशेयकुतपपट्टक्षौमदुकूलजाः। अल्प
शौचाः स्युः शुद्ध्यन्ते शोषणप्रोक्षणादिभिः। तान्येवामेध्ययुक्तानि शोधयेत्क्षालनैः स्वकैः। र
लिकामुपधानं च पुष्परक्ताम्बरं तथा। शोषयित्वातपे किंचित्करैः संमार्जयेन्मुहुः। पश्चात्तु

वारिणा प्रोक्ष्य विनियुंजीत कर्मणि। तान्यप्यतिमलिष्ठानि यथावत्परिशोधयेदिति। पुष्प
रक्तग्रहणं प्रक्षालनासहहरिद्रादिरक्तस्याप्युपदर्शनार्थं। अयमभिप्रायः। यत्कुसुम्भादिना र
क्तं क्षालनासहं तदातपशोषणादिना शुद्ध्यतु। यत्तु मांजिष्ठादिकं क्षालनेन न विनश्यति
तत्प्रक्षालनेनैव मातपशोषणमात्रेण।                शुनोपहतं चैलमवगाहेत प्रक्षाल्य वाते
शेमिनां संस्पृश्य पुनः प्रक्षाल्य पादेवा वध्यमयतो भवति। वस्त्रसहितं चेत्वमूत्रे रुहुईस्पृशे।
दवगाहः। अथवा स्वयं क्षालनमिति विवेकः। चैलानामुपहतानामुत्सर्गेन गंधलेपापनय
नमात्रं तन्मात्रं तु दग्धं वा नवानां वा भस्मा मत्स्यक्षणादिति। जीर्णं दग्धं काष्ठनां नवानां वा संस्का
यं चातुर्वर्णानां।                उपहतानां प्रोक्षणमिति निरुपहतं चैव निर्मुक्तं।                शयना

Indira Gandhi National
Centre for the Arts

सनयानामासंहतवद्वोधम्॥ संहतवत्॥ राशीभूतद्रव्यवत्॥ अनेनप्रोक्षणाद्बुद्धिरित्यर्थं
भवति॥ शयनादीनामपिसंहतशुद्धवाक्यमेवमाह॥ शयनाशनयानानिरोमवस्त्राणि
यानिचावस्त्राणितानिसर्वाणिसंहतानिप्रवक्षते॥ वो
धायनः॥ वीरुधःप्रोक्षणाच्छुद्धिःशाकमूलफलानिच॥ तन्मात्रस्यापहारेणवानिष्कषीकरणेन
वा॥ असिद्धस्यान्नस्ययन्मात्रमुपहतंस्यात्तन्मात्रमुत्सृज्यशेषस्यकंडनक्षालनेकुर्यात्॥ २४६
एतदल्पद्रव्यविषयम्॥ बहूनांतुकांस्यपात्रेइंद्रव्यम्॥ प्रोक्षणपर्यग्निकरणावगाहनैर्वी
हियवगोधूममानांविमर्शनैःप्रोक्षणैश्शमीधान्यानामिति॥ अस्यार्थः॥ अनेकपुरुषोद्वार्याणांय
वगोधूममानांप्रोक्षणपर्यग्निकरणावगाहनैःशुद्धिः॥ पर्यग्निकरणमभ्यालिमर्शनं॥ अवगाहनं

क्षालनवत्॥ अत्रप्रोक्षणादीनिसर्वत्रदोषाल्पत्वापेक्षयायोज्यानि॥ नयथासख्यं॥ व्रीह्यादितं
डुलानांफलीकृतानां॥ विमर्शनेनप्रोक्षणेनशुद्धिः॥ विमर्शनमल्पानांप्रोक्षणंबहूनां॥ कंडनेनश्ल
क्ष्णीकृतानि॥ तण्डुलकणाश्चतंडुलाः॥ फलीकृताइत्युच्यन्ते॥ विमर्शनंपाणिस्पर्शनिर्मलीकर
णम्॥ शमीधान्यानांमुद्गादीनांएकपुरुषोद्वार्याणांनिघर्षणविमर्दनक्षालनतोल्पानांक्षालने
न॥ अनेकपुरुषोद्वार्याणांप्रोक्षणेन॥ यश्चतंडुलांश्चपरित्यजेदिति॥ तदत्यल्पपरिमाणवि
षयम्॥ गृहदाहेसमुत्पन्नेदग्धेवरहमात्रके॥ अतोऽन्यच्चकृतोव्रीहिद्रव्यद्रव्या
णसंग्रहः॥ मृन्मयेनावबद्धानामधोदुग्धवितिष्ठताम्॥ यवमाषतिलादीनांनदोषोमनुरब्र
वीत्॥ ततःसंक्रममाणेऽग्नौस्थानस्थानेवहन्ययोगेनवपाणिवधसंत्रकेवलंगृहदीपनं॥ तत्र ड

Indira Gandhi National
Centre for the Arts

इत्यादीनि सर्वाणि गृह्णीयादविचारयन्॥ पुष्पफलानां विष्किरावहतानां प्रक्षालन
मभ्युक्षणमित्येके। पर्णानामभ्युक्षणम्। सकृदुपयुक्तानामुत्सर्गः। विष्किरा आद्यकुक्कुटा
दयः। अवहतं पादावकीर्णं विष्किरावहतानामिति। सर्वत्राचेति। असंस्कृतायां
भूमौ न्यस्तानां प्रक्षालनं। परोक्षाहतानामभ्युक्षणमेव। तृणसमिधामसंस्कृतायाममेध्या
द्युपहतानामेकपुरुषोद्वार्याणां तृणसमिधां यज्ञियत्वेन प्रसिद्धः पलाशादिद्यति। शि २४७
२क्तानामपामार्गादिसमिधां। मृत्पर्णतृणकाष्ठानां अस्थिश्वाण्डालवयवैः स्पर्शने।
विहितं शोधनं सोमसूर्यांशुमारुतैः। प्रोक्षणेन तु पुस्तकमिति। रथ्याकर्दमतो
यानि नावः पथि तृणानि चैव मारुतेनैव शुध्यन्तीति पक्वेष्टकचितानि च।

तत्र मनुः। पक्षिजग्धं गवा घ्रातमवधूतमवक्षुतं। दूषितं केशकीटाद्यैर्मृत्प्रक्षे
पेण शुध्यति। एतच्च तस्य पक्षिविषयम्। अवधूतं पक्षितिमक्षिप्यो क्षिप्यत्यकं वा। अवक्षुतं य
स्योपरि क्षुतं कृतं। प्रक्षेपणमुपरि तस्मिन्नोपिद्दर्शनार्थम्। सलिलं भस्म मृ
द्वापि प्रक्षेप्तव्यं विशुद्धये। यच्च पाकानन्तरं केशकीटैर्दूषितं तच्छुद्धादिकीटावपन्नमिति।
पक्वं द्रोणाधिकं चान्नं काकश्वाद्युपघातितं। ग्रासमुद्धृत्य तन्मात्रं यच्च लालाहतं तथा
त्र। द्रोणपक्वापदं वा द्रोणाधिकं पलशतत्रयम्। अग्निज्वालोपसंस्पर्शो सुवर्णमपि सर्पि
षा। विप्राणां ब्रह्मघोषेण पूतं सोऽन्नं च तत्क्षणे। यच्च जमदग्निना लिखितम्। अन्नमेकाहिकं पक्षि
श्वकाकाद्युपघातितं। केशकीटावपन्नं च तदप्येवं विशुध्यति। क्वचिन्न्यापि विधिर्दृष्ट एवमेव

Indira Gandhi National
Centre for the Arts

नीयमितिरीतिः।तन्मात्रमत्रमुहूर्त्यशेषंसंस्कारमर्हतीति।देवज्ञोल्लीरेवयात्रा।देवज्ञोणीयहणंच
द्रव्यप्रदर्शनार्थम्।प्रस्तेतरुसर्वेषांसंस्कारश्रुतेतेनोक्तः।द्रवाणांप्लावनेनैवघनानांप्रोक्ष
णेनत्वाद्युपगेनमुखसंस्पृष्टमप्येतत्तुविरामियात्।घनाःपर्य्यटवटिकादयः।द्रवाणांप्लावनेन
वेत्येषाशुद्धिर्गोरसस्य।     अपरेषांघृततैलानांप्लावनंगोरसस्यच।तासांनिप्लावयेद् २५८
द्भिःशाकमूलफलानिच।अपरेषांसर्वेसजातीयद्रव्यप्लावनेनैवशुद्धिः।तथाघृतदधिपय
स्तक्राणांमाकरस्तात्स्थितानामदोषः।आधारदोषेतुनयेत्यवेत्यत्रात्ररेद्रवम्।घृतंचपायसं
क्षीरंतथैवेक्षुरसोगुडः।शूद्रस्तात्स्थितंतक्रंतथामधुनदुष्यति।     आममांसंघृतंक्षौ
द्रंस्नेहाश्चफलसंभवाः।म्लेच्छस्तात्स्थिताह्येतानिष्काशाःशुचयःस्मृताः।एतच्चाकरस्तात्

स्थविषयम्।अनाकरेपिद्रोणाधिकान्नोपसेवनसमर्थघृतादिविषयमपिततोन्यूनस्यापिदेश
कालाद्यपेक्षयाप्रणादेःशुद्धिरेवेति।     देशकालंतथात्मानंद्रव्यंद्रव्यप्रयोज
नम्।उपपत्तिमवस्थांचज्ञात्वाशौचंप्रकल्पयेत्।     गोकुलेकंदुशालायांतैलयंत्रेक्षु
यंत्रयोः।अमीमांस्यानिशौचानिस्त्रीषुबालातुरेषुच।क्वचित्तुगोकुलेकंदुशालायामितिपा
ठः।कंदुःकंदुशालायज्ञशाला।     नियामिनांगुडानांचलवणानांतथैवच।कुसुंभकुसुमा
नांचऊर्णाकर्पासयोस्तथा।नैषांत्रकथिताशुद्धिरित्याहभगवान्यमः।नियोसाहिंगुप्रभृत
यः।इदंचअल्पपरिमाणविषयंबहूनांतुबोधायनोक्तंवहमांकुसुंभकार्पासगुडलवण
तंसर्पिषाकविनीभूतानांवाएलाहिंसपहेपोसणेनेवशुद्धिरिति।अत्यल्पेत्वपरित्यागः।त

Indira Gandhi National
Centre for the Arts

चापिदेशकालाद्यपेक्षयापरित्यागः। उच्छिष्टेनतुसंस्पृष्टोद्रव्यहस्तःकथंचन। आचाये
वस्तद्द्रव्यमाचान्तःशुचितामियात्। तत्रमन्त्रः। आपःशुद्धाभूमिग
तावितृष्णायत्रगोर्भवेत्। अव्याप्ताश्चेदमेध्येनगंधवर्णरसान्विताः। भूमिगोभूमि
कतोयंप्रकृतिस्थंमहीगतम्। भूमिष्ठमुदकंशुद्धंशुचितोयंशिलागतम्। गंधवर्णरसैर्दुष्टैर्वा
र्जितंयदितद्भवेत्। शिलागतंअस्मपात्रस्थं। अधिगंधा...पितामिमेलाः पृथिवीग २४९
ताःअक्षीणाश्चेद्गोपानादापःशुद्धतरास्मृताः। अधिगंधाविगाहितं। गोधर्वहिताः।
भूमिष्ठमुदकंशुद्धंगंधवर्णरसान्वितं। केशास्थिशावविण्मूत्रसंयोगेसृष्टितंयदि। प्र
पामरण्येघटकंवक्तपेद्रोण्यांजलंकोशगताश्चथापरःमतेपिशुद्धाश्चदपेयमाक्षरापन्नताभूमि

गताःपिबेत्तु। अपांअपास्थितजलम्। घटकलसामाद्यजलोद्धारणार्थंस्थापितःकरकादिः। द्रोणीक
ष्ठाम्बुवाहिनी। कोशश्चर्मपुटः। मतेपिशुद्धाःशुद्धंत्यक्त्वाहिजधामिकमपिअपादिस्थितजलमपे
यमितिश्लोकार्थः। शाखावेतावरुणांशाकिंशाश्वस्मान्नरात्रौशृङ्गीयात्। धामोधामङ्गस्युपरि
ष्टाद्धारयन्। उच्छिष्टंमलिनंक्लिन्नंयच्चविष्ठाद्युपलेपितम्। अद्भिःशुद्ध्यतितत्सर्वमपां
शुद्धिःकथंभवेत्। सूर्यस्यरश्मिपातेनमारुतस्पर्शनेनच। गवांमूत्रपुरीषेनशुद्ध्यंत्यापइतिस्थि
तिः। मृतपंचनखात्कूपादत्यन्तोपहतात्तथा। अपःसमुद्धरेत्सर्वाःशेषंवस्त्रेणशोधयेत्। व
ह्निप्रज्वालनंकूपेपंचकाचितोपंचगव्येनवे▸त्यश्रान्नवतोयेसमुद्भवेजलाशयेषुथान्ये
षुस्थावरेषुवसुंधरेकूपवच्छोधिताशुद्धिर्महत्सुवनदूषितो। अत्यंतोपहताद्विति। शारीरैर्म

× रूपा२ बे२

Indira Gandhi National
Centre for the Arts

लेसुराणि मेध्येयदुपहतं तत्त्यंतोपहतमिति विज्ञाना परिसाधितम्॥ शस्त्रेणकुद्दालादिना।
उपानंतरश्मिविण्मूत्रशीरजोमद्यमेवचा॥ एभिर्दूषितेकूपेकुंतानांषष्टिमुद्धरेत्॥
अस्थिचर्मविनिर्मुक्तेर्दूषितेखरादिभिः॥ उद्धृत्यतज्जलंसर्वंशोधनंपरिमार्जनेन वा॥
पीकूपतडागेषुदूषितेषुविशोधनम्॥ घटानांशतमुद्धृत्यपंचगव्यंततःक्षिपेत्॥ स्वस्तिश्चपा
कचाण्डालैर्दूषितेषुविशोधनं॥ उद्धरेदुदकंसर्वंमार्जनंपरिशोधनं॥ अस्थिचर्माव २५७
सिक्तेनस्वमार्जारश्वमूषकैश्चदूषितंउत्पन्नेत्रोयंतवाधस्थानुशोधनं॥ अस्थिचर्मादिपतितं
खरवानरसूकरैः॥ उद्धरेदुदकंसर्वंशोधनंपरिमार्जनै वापीकूपतडागेषुदूषितेषुकथं
चन॥ उद्धृत्यवैकुंभशतंपंचगव्येनशुद्ध्यति॥ अवसिक्तेनअवसेकेनसंयोगेनेतियावत्॥ पतित

तमुद्धरेदित्यन्वयः॥ खरवानरसूकरेर्दूषितमित्यन्वयः॥ परिमार्जनमपद्रव्यनिरसनम्॥ वापीकूप
तडागेष्विति॥ वापीसोपानयुक्ताः कूपाः तडागः॥ पद्माकरः॥ श्वसृगालखरोष्ट्रश्च क्रव्यादिश्च
गुप्तितम्॥ उद्धरेदुदकंसर्वंपंचपिण्डान्दसैथा॥ येषाम स्थानमोसंचतच्छरीरियुतंच
यत्र॥ वापीकूपतडागेषुजलंसर्वंसमुद्धृतिशरीरिमृतशरीरैः॥ सकर्दमंचकुणपंतेत्यक्तोयमपा
स्यतन्॥ प्रतिक्षिपेत्पंचगव्यंचसमंत्रंसर्वेषुक्षिपेत्॥ अपाच्छकुणपंतेस्पोवरूतोयस्यएवच॥ शतं
षष्ठ्यथवात्रिंशत्तोयकुंभान्समुद्धरेत्॥ पंचगव्यंततस्तेषुप्रक्षिपेन्मंत्रसंयुतम्॥ अत्रनिबंधकारा
णामियंव्यवस्था॥ अत्यल्पतोयेसकलजलोद्धारः॥ एकरूपोपघातेपियत्तुस्तरशोधनंतद्दृष्टाल्प
नत्पतापेक्षया॥ दृषकगुरुत्वलघुत्वापेक्षयाच॥ अत्यन्तमहत्सुवरउपघातकसंबंधकदेशातिरिक्त

Indira Gandhi National
Centre for the Arts

जटमल्लविलास पत्राणि १०२ खण्डित वे०१८

देशेषु दोषान्तावण्वाजलोद्धारकं मानोर्विंशत्यष्टिशतसंख्याकथनं ततारतम्योपेक्षया।
शूद्रागारवामहिष्यश्वश्वाझाणीवप्रसूतिका दशरात्रेण शुध्यंति भूमिष्ठं च नवोदकं। एकरात्रोषिता
श्वाश्रुत्यजेदाप स्मृतः। अत्र पर्युषितत्वमात्रं विवक्षितं न रात्रिगतत्वं एकत्वमविवक्षितं।
त्रिविधाशोध्या भूमिः। तत्र देवलः। यत्र प्रसूयते नारी म्रियते दह्यते थवा।
चांडालाध्युषितं यत्र तत्र मूत्रादि गच्छति। एवं कश्मलभूमिष्ठा भूरमेध्या प्रकीर्तिता। श्वशूकरखरोष्ट्रा २५१
द्यैः संस्पृष्टा दुष्टतां व्रजेत्। अंगारतुषकेशास्थि तस्माद्येमलिना स्मृता। एवं त्रिविधाया अपि भूमेः
शुद्धिप्रकारमाह स एव। पंचधा वा चतुर्धा वा भूरमेध्या विशुध्यति। दुष्टा द्विधा त्रिधा वापि शुध्यते
मलिनैकधा। दहनं खननं भूमेरुपलेपनवापने। पर्जन्यवर्षणं चेति शौचं पंचविधं स्मृतं। शूक

Indira Gandhi National Centre for the Arts